श्री केशवनाथविरचित
गोदापरिणयचम्प्वाः पाठसमीक्षात्मकं सम्पादनम्
Critical Edition of Godāpariṇayacampū written by Keśavanātha



सम्पादकौ

डा.वि.एस्.वि.भास्कर् रेड्डी, M.A., M.Sc., M.Ed., Ph.D.

फल्गुणराव् आर्., B.Sc., M.A., B.Ed., M.Phil.

कृष्णवेणी प्रकाशनम्, कत्तिपूडि

2014

श्री केशवनाथविरचित
गोदापरिणयचम्प्वाः पाठसमीक्षात्मकं सम्पादनम्

Critical Edition of Godāpariṇayacampū
written by Keśavanātha

सम्पादकौ

डा. वि.एस्.वि. भास्कर् रेड्डि
M.A., M.Sc., M.Ed., Ph.D.

फल्गुणराव् आर्
B.Sc., B.Ed., M.A., M.Phil.

कृष्णवेणी प्रकाशनम्
कत्तिपूडि
2014

Critical Edition of Godāpariṇayacampū
Written by Keśavanātha

Edited By

Dr. V.S.V. Bhaskar Reddy

Assistant Prfessor in Education
Rashtriya Sanskrit Samsthan
(Deemed University)
Mumbai Campus

&

Phalguna Rao R.

Technical Assistant,
Archaeology & Museums Dept.
Govt. of Andhra Pradesh
kpcity07@gmail.com

Price : Rs. 200/-

Copies : 500

Typeset & printed a :
ANNAPURNA C RAPHICS
54/3, R.S.Gardens, Tirupati

Published by :
Krisl naveni Prakasanam


ISBN No. : 978-93-5196-512-1



मम माता-पितृचरणेभ्यो सादरं सश्रद्धञ्च समर्प्यते ।

- आर्. फल्गुणरावः

Dr. Sana Venkateswara Reddy
M.A.(Skt.), M.A.(Telugu), M.A.(Phil.), M.Phil., Ph.D.
Telugu Pandit, M.P.U.P.School, Pallakonda
Kaluvoya Mandal, Nellore Dist. Andhra Pradesh



शुभकामना:

अमृतं मधुरं सम्यक् संस्कृतं ततोऽधिकम् ।
देवभाग्यमिदं यस्मात् देवभाषेति कथ्यते ।। इति ।

अमृतापेक्षया मधुरतमायां देवभाषायां संस्कृतभाषायां अनादिकालादारभ्य महर्षिभिः पण्डितादिभिः स्वीयप्रत्यक्षानुभवैः तपोमयशक्तेश्चाधारेण सृष्टेः रहस्यत्मकानि बहूनि सत्यानि आविष्कृतानि आसन्। एवं सनातनकालादारभ्य आविष्कृतानि ज्ञान-विज्ञानादीनि सत्यानि संस्कृतभाषायामेव निक्षिप्तानीति जगद्विदितिमेव । वर्तमानकालीन आधुनिकयुगे मानवाः भौतिकज्ञानस्य विज्ञानस्य च सम्पत्तेराधारेणैव विकासो जायत इति मत्वा सनातनकालादाविष्कृताणां ज्ञान-विज्ञानादि सत्यानां प्रति उपेक्षा कृता वर्तते । फलतः सनातनकालीनं ज्ञान-विज्ञानादिकं विनष्टं जातम् । केचन सनातनकालीनज्ञान-विज्ञानसम्बद्धाः पाण्डुलिपिग्रन्था आरक्षितास्सन्ति विविधप्राच्यशोधसंस्थानेषु ।

विलुप्तमानावस्थायां विद्यमानस्य संस्कृतवाङ्मयस्थ विविधग्रन्थानां समालोचनात्मकसम्पादनं कृत्वा प्रकाशे आनयनाय सर्वैः संस्कृतज्ञैः निष्ठासहिताः प्रयासाः विधेया एव । महदानन्दविषयोऽयं मम मित्रद्वयेन भारतस्थ विविधप्राच्यशोधसंस्थानैः संरक्षितेषु पाण्डुलिपिग्रन्थेषु गोदापरिणयचम्पू इत्याख्यस्य काव्यस्य प्रकाशे आनयनय एताभ्यामुत्तमाः प्रयासाः विहिताः । मम कामना वर्तते यत् - उत्तरोत्तरकाले च बहूनाम् अप्रकाशितानां संस्कृतग्रन्थानां प्रकाशे आनयनाय एतयोः मित्रयोः सदा कलियुग-भगवतः श्रीवेङ्कटेश्वरस्य अनुकम्पा अनुग्रहश्च भवतु इति ।

।। समस्तसन्मङ्गलानि भवन्तु ।।

इत्थं
विद्वद्विधेयः
डा.साना वेङ्कटेश्वर रेड्डि

कृतज्ञतानिवेदनम्

विना भगवतः कृपा न कार्यं सिद्ध्यति। अतः निराकार-निर्गुण-सर्वव्यापि-सच्चिदानन्दपरमात्मने मनसा प्रणमावः। विना तालपत्राणि एकस्य ग्रन्थस्य पाठसमीक्षात्मकं सम्पादनं न सिद्ध्यति अतः पाठसम्पादनकार्येऽस्मिन् पञ्चतालपत्राणि स्वीकृतानि। एतत् सिद्ध्यर्थं द्वे तालपत्रे दत्तवद्भ्यः अपि च ग्रन्थलिपिज्ञानं बोधितवन्तभ्यः तिरुपतिस्थ श्रीवेङ्कटेश्वर यूनिवर्सिटि ओरियंटल् रिसर्च इन्स्टिटय़ूट् निर्देशकेभ्यः प्रो.वेमूरि वेंकट रमणारेड्डि महोदयेभ्यः, द्वे तालपत्रे दत्तवद्भ्यः चेन्नै नगरस्थ GOML. निर्देशकेभ्यः, तालपत्रमेकं दत्तवद्भ्यः Baroda Orintal Manuscripts Library निर्देशकेभ्यश्च हार्दान् धन्यवादान् समर्पयावः।

तिरुपतिस्थ राष्ट्रियसंस्कृतविद्यापीठे विराजमानेभ्यः अनुसन्धान-मुद्रणविभागाध्यक्षरूपेण छात्राणामादर्शरूपेण च विराजमानेभ्यः **डा. विरूपाक्ष वि जड्डीपाल्** महोदयेभ्यः, ये च अभिनवकालिदासरूपेण विज्ञैः कीर्त्यन्ते तेभ्यः **डा. जि एस् आर् कृष्णमूर्ति** महोदयेभ्यश्च कार्तज्ञ्यं कुसुमाञ्जलिं समर्पयावः।

मम (फल्गुणराव्) एम्. फिल् मार्गदर्शकाः श्रीवैष्णवसाम्प्रदायसम्बद्धाः न्यायालङ्कारादिशास्त्रज्ञाः करतलामलकीकृतदिव्यप्रबन्धाः भगवत्कैङ्कर्यनिरताः **डा. चक्रवर्ति रङ्गनाथन्** महोदयेभ्यः, मम पिहेच्. डि. मार्गदर्शकाः हैदराबाद् केन्द्रियविश्वविद्यालये वैज्ञानिकानुसन्धाने बद्धाः **डा. जे.एस्.आर्.ए. प्रसाद्** महोदयेभ्यश्च सप्रमाणं कृतज्ञताकुसुमानि समर्पयामि।

आवयोः मित्रवरेण्यः, **मित्रशब्दे त्र** इत्यक्षरस्य परिपूर्णस्वरूपः **डा.साना वेङ्कटेश्वर रेड्डी** महोदयेभ्यः, गोदापरिणयचम्पूममुं ग्रन्थमुद्रणे अमूल्यं साहाय्यं कृतवद्भ्यः तिरुपतिस्थ विद्यापीठे परीक्षाविभागे कार्यं कृतवद्भ्यः **डा. कम्प्यूटर् शर्मा** महाभागेभ्यश्च हार्दिकं धन्यवादान् वितरावः। अन्ये ये च प्रत्यक्ष-परोक्षरूपेण साहाय्यं कृतवद्भ्यः तेभ्यश्च धन्यवादान् समर्पयावः।

Editors

Dr. V.S.V. Bhaskar Reddy

Phalguna Rao R.

पुरोवाक्

विश्वेस्मिन् भारतीया संस्कृतिः सर्वाः संस्कृतीरतिशेत, भारतीयज्ञान-विज्ञानादिकञ्चातिशेत इत्यत्र नास्ति सन्देहः । अद्यत्वे युगे भौतिकी समुन्नतिमेव विकासाय पराकाष्ठां मन्यमानाः पाश्चात्याश्च शान्तिसुखञ्चोपलब्धुं भारतीयानां ज्ञान-विज्ञान-संस्कृतिम् एतदजीवनपद्धतिञ्च अनुसरन्त आत्मानं कृतकृत्या मन्वते । एतादृशीयमस्माकं पुण्या पुरातनी च संस्कृतिः संस्कृतमूलैव । संस्कृतवाङ्मयः कालानुसारं द्विविधा भवति यत् वैदिकवाङ्मयः लौकिकवाङ्मयश्चेति । वैदिकवाङ्मये वेद-वेदाङ्गादय अन्तर्भवन्ति, लौकिकवाङ्मये तु महाकाव्यपुराणादीनि अन्तर्भवन्ति । इतिहासकालादारभ्य बहुभिः पण्डितैः विद्वांसैः कविभिर्वा आरचिताः बहवः ग्रन्थाः प्रकाशे नागताः सन्ति । तजानीन्तनकाले तैः ग्रन्थानां रचना तालपत्रग्रन्थेषु कृता वर्तते । बहवः तालपत्रग्रन्था इदानीं नैव दृश्यते । केचन विनष्टाः शिथिलाश्च वर्तन्ते । अपरे प्राच्यशोधसंस्थानैः संरक्षिताः वर्तन्ते । भारतस्थ विविधप्राच्यशोधसंस्थानैः संरक्षितेषु विविधग्रन्थेषु गोदापरिणयचम्पू इत्याख्यस्य काव्यस्य प्रकाशे आनयनाय आवाभ्यां प्रयासो कृतः ।

काव्यामृतरसास्वादनिपुणाः सहृदयाः समीक्षकाः सम्पादकाः विद्वांसः जानन्ति यत्- धर्मार्थकाममोक्षाणां पुरुषार्थचतुष्टयानां संसाधनकर्मणि प्रवृत्तिभूतं व्यवहारादि लौकिकताप्रदायकं सत्काव्यं काव्यमेवास्ति । उपस्थापनादृष्ट्या गद्य-पद्यभेदेन काव्यस्यापि भेदद्वयं प्राक् भवति । एतयोः गद्य-पद्ययोः सम्मिश्रणात् चम्पूकाव्यं प्रवर्तते । चम्पूकाव्यस्य रचना नाम कवेः पाण्डित्यस्य परीक्षैव भवति । चम्पूकाव्यस्य रचनायां बहवः पण्डिताः स्वीयप्रतिभायाः वैशिष्ट्यं प्रदर्शितम् । एवमेव षोडशशतके वेदादिनाथ इत्युपाधिभाजेन केशवनाथेन गोदापरिणयचम्पू इत्याख्यं काव्यं ग्रन्थलिप्याम् आरचितम् । काव्येऽस्मिन् मोक्ष-परुषार्थो वर्तते । काव्यमिदं पञ्चस्तबकेषु विभक्तो वर्तते ।

ग्रन्थस्यास्य सम्पादने सहाय्यं प्रदत्तेभ्यो प्रोत्साहितभ्यो तिरुपतिस्थ श्रीवेङ्कटेश्वरविश्वविद्यालयस्थ प्राच्यशोधसंस्थानस्य निर्देशकेभ्यो, चेन्नै नगरस्थ सर्वकारीय प्राच्यतालपत्रग्रन्थालयस्य निर्देशकेभ्यो, बडोदा नगरस्थ प्राच्यशोधसंस्थानस्य निर्देशकेभ्यो, चेन्नै नगरस्थ अडयार् ग्रन्थालयस्य निर्देशकेभ्यो, मैसूर नगरस्थ प्राच्यशोधसंस्थानस्य निर्देशकेभ्यश्च भूरि भूरि धन्यवादान् समर्पयावः । सम्पाद्यमानस्य ग्रन्थान्तर्गते उपयुक्तायाः ग्रन्थलिपिरवबोधाय वैयक्तिक-प्रशिक्षणं प्रदत्तेभ्योः आचार्य वेमूरि वेंकटरमणा रेड्डिमहोदयेभ्यो, ग्रन्थास्यास्य सम्पादने प्रकाशने च समयानुसारं संसूचनाः प्रदत्तेभ्यो आचार्य विरूपाक्ष वि जड्डीपाल् महोदयेभ्यो, डा. सि. रङ्गनाथन् महोदयभ्यश्च हार्दान् धन्यवादान् व्याहरावः । ग्रन्थसम्पादने प्रकाशनवेलायाञ्च नैतिकसमर्थनं प्रोत्साहश्च प्रदत्तेभ्यो मम मित्रेभ्यो डा. साना वेङ्कटेश्वर रेड्डिमहोदयेभ्यो हार्दान् धन्यवादान् व्याहरावः । पाठकानां कृते निवेदनमेकं वर्तते, तद्यथा -

प्रकाशस्यास्य साफल्यं यदा वै भविष्यति ।
तदा परिश्रमः फलीभूत इत्यावयोः धारणा ॥ इति ।

तिरुपतिः   विद्वद्वंशवदौ

आषाढपूर्णिमा, 2014 ए.डि.   डा.वि.यस्.वि.भास्कर रेड्डि

आर्. फल्गुण रावः

उपोद्घातः

संस्कृतसाहित्यम् -

"संस्कारवत्येव गिरा मनीषी" (कु.सं.प्र.स) इति महाकविकालिदासवचनमनुसंस्कृता व्याकरणेन परिशुद्धा परिष्कृता च या भाषा सैव संस्कृतभाषा भवतीति विज्ञायते। दण्ड्याचार्योऽपि **"संस्कृतं नाम दैवीवागन्वाख्याता"** महर्षिभिरिति भाषायाः अस्याः माहात्म्यं प्रत्यपादयत्। वस्तुतस्तु भाषेयं ऋग्वेदकालादाराभ्य अद्य यावत् समेधमानमेव दरीदृश्यते। श्रुति - स्मृति- इतिहास- पुराणादीनि सर्वाण्यपि भाषायामस्यामेव विराजन्त इति हेतोः भाषेयं सर्वासां भाषायां जननी प्राचीना च भवतीति निश्चयेन वक्तुं शक्नुमः।

यथेयं भाषा अन्वर्था तथैवास्यास्साहित्यमपि अन्वर्थं भवति। **"सहितयोर्भावः साहित्यम्"** हितेन सह वर्तत इति सहितं भवति। अत्र हितं नाम आत्मनः सुखम्। तथा च संस्कृतस्य साहित्यस्य पठनेन आत्मसुखं लभ्यत इति निश्चयः। संस्कृते विद्यमानानां वैदिक- शास्त्रीय- लौकिकवाङ्मयानामध्ययनेन सर्वेऽपि मानवः हितं प्राप्नोतीति सुदृढाभिप्रायः वर्तते।

अस्मिन् संस्कृतप्रपञ्चे बहूनि वाङ्मयानि विद्योतन्ते। तेषु काव्यवाङ्मयम् अतीवविशालं प्रथितं च भवति। धीमन्तः कवयः अनेकानि काव्यरत्नानि प्रादुरभावयन्। काव्यानि च तानि स्थूलतया दृश्यश्रव्यभेदेन द्विधा विभक्तानि। दृश्यानि च रूपकोपरूपकभेदेन बहुधा भिन्नानि। श्रवणपेयानि श्रव्यकाव्यानि पद्य-गद्य-चम्पूभेदेन त्रिधा विभक्तानि। तत्र पद्यकाव्यानि छन्दोबद्धानि भूत्वा रागादिना सहृदयलोकं रञ्जयितुं नितरां समर्थानि भवन्ति। गद्यकाव्यानि तु अर्थगौरवेण दीर्घसमासबाहुल्येन च श्रोतृजनसमावर्जकानि भवन्ति।

चम्पूकाव्यमहिमा

पद्य-गद्य-चम्पूभेदेन विभक्तेषु श्रव्यकाव्येषु चम्पूकाव्यस्यास्ति सुमहद्वैशिष्ट्यम्। चपि धातोः ऊ प्रत्ययः चम्पयति, चम्पति इति, मोदं या ददाति सा चम्पू इति चम्पूपदस्य व्युत्पत्तिः साधारणतया व्यवह्रियते। भणति किल दण्ड्याचार्यः **"गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते"** इति। हरिदासभट्टाचार्यस्य व्याख्यायां **"चमत्कृत्य पुनाति सहृदयान् विस्मितीकृत्य प्रसादयति"** इति चम्पू इति दृश्यते। अन्यत्र

गद्यपद्यमयं काव्यं सम्बन्धं बहुवर्णितम्।
सालङ्कृतं रसैस्सिक्तं चम्पूकाव्यमुदाहृतम्।। इत्युक्तम्।

भोजदेवस्तु -

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः
हृद्या हि वाद्यकलया कलितेव गीतिः।
तस्माद्दधातु कविमार्गजुषां सुखाय
चम्पूप्रबन्धरचनां रसनामदीया।।

इतिचम्पूकाव्यं नितान्तं प्रशंसति।

शरभोजिमहाराजः -

पद्यं हृद्यमपीह गद्यरहितं धत्ते न हृद्यास्पदं
गद्यं पद्यविवर्जितं च भजते न स्वाद्यतां मानसे।
साहित्यं हि तयोर्द्वयोरपि सुधामाध्वीकयोर्योगवत्
सन्तोषं हृदयाम्बुजे वितनुते साहित्यविद्याजुषाम्।।

इति काव्यमेतत्स्तौति।

चम्पूकाव्येषु त्रिविक्रमभट्टस्य नलचम्पूः प्राथम्यं भजते। चम्पूकाव्यलेखने कवेः पद्ये गद्ये च समानं पाण्डित्यमावश्यकम्। यथा पद्यं हृदयङ्गमं भवति तथैव गद्यमपि मनोहरं भवितव्यम्। यदि तयोरेकस्य न्यूनता भवेत् तर्हि तत्काव्यमनादरतां प्राप्नोति। अत एव यथा पद्यकाव्यानि

वाङ्मये विलसन्ति, न तथा चम्पूकाव्यानि सन्ति। चम्पूकाव्यलेखने सर्वस्यापि कवेः नितरां प्रतिभापाटवमावश्यकम्।

गोदापरिणयचम्पू - प्रणेता च

अपारे काव्यसंसारे नैके चम्पूग्रन्थाः विद्योतन्ते। यथा - "भागवतचम्पू" "यशस्तिलकचम्पू" "दमयन्तीचम्पू" "रामायणचम्पू" "भारतचम्पू" जीवन्धरचम्पू" इत्यादयः। एतेषु **"गोदापरिणयचम्पूकाव्यमन्यतमं"** भवति। रसगर्भनिर्भरस्यास्य चम्पूकाव्यस्य प्रणेता विद्यते। तत्र भवान् "**श्री गोदापुरोहितः वेदाधिनाथभट्टाचार्याभिधः श्रीमान् केशवनाथः**" इति स्वयं स्वकाव्ये ब्रवीति -

"**इति गोदापुरोहितेन वेदाधिनाथभट्टाचार्येण केशवनाथेन विरचिते गोदापरिणयचम्पूकाव्ये प्रथमस्तबकः**" इति। कवेरस्य जन्मकालादिविषये स्पष्टतया प्रमाणं नोपलभ्यते। मातापितुः विषये, वंशगोत्रादिविषये वा स्वयमपि ग्रन्थे कुत्रापि नालिखत्। एवमेव इतिहासादिग्रन्थपरिशीलनेनापि अस्य विषये किमपि न प्राप्यते। परन्तु ग्रन्थावलोकनेन कविरयं जन्मना श्रीवैष्णवः भगवद्भक्तः भगवत्कैङ्कर्यनिरतः श्रीगोदायाः पुरोहितः कविश्रेष्ठश्च विराजते इत्येव विषयान् वयं ज्ञातुं पारयामः। एवमेव श्रीविष्णुचित्तवंशीयः अष्टादशशतककालीनः स्यादिति, तथैव पठ्यमान श्रीगोदा अष्टोत्तरशतनामावलि कर्ता स्यादित्यादि पूर्वाचार्याणामभिप्रायः।

गोदापरिणयचम्पूकाव्यस्य परिचयः

काव्यस्यास्य नाम श्रवणेनैवान्तर्विद्यमानविषयः प्रस्फुटो भवति। संसारसागरनिमग्नचेतनोज्जीवनाय श्रियः पतिः श्रीवैकुण्ठनिकेतनः श्रीमन्नारायणः स्वायुधाभरणादिकं भूलोके अवतारयामासा तथाऽवतीर्णा एव - आल्वार् शब्दवाच्या नित्यसूरयः। अगाधभगवद्भक्तिसिन्धव इमे अखिलभुवनजन्मस्थेमभङ्गादिलीलं पुरुषोत्तमं श्रीमन्नारायणं भूलोके

अष्टोत्तरशतादिव्यधामसु अर्चावताररूपेण विराजमानं चतुस्सहस्त्रगाथाभिरस्तुवन्। ते च चकासति द्वादश संख्याकाः -

"भूतं सरश्च महदाह्वयभट्टनाथ
श्रीभक्तिसारकुलशेखर योगिवाहान्।
भक्तांघ्रिरेणु परकालयतीन्द्रमिश्रान्
श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम्"।। इति।

अत्र द्वादशसु भगवद्भक्तिमती श्री गोदाख्या विराजते। एवमेव भट्टनाथशब्दवाच्यः पेरियाल्वार् विष्णुचित्तादि नामग्राही एकः नित्यसूरिः विराजते। एतयोरुभयोः चरित्रमीषद्विव्रियते।

भट्टनाथः

तमिलनाडु प्रदेशे पाण्ड्यदेशः इति एकः देशः वर्तते। तत्र "श्रीविल्लिपुत्तूर्" इति नामकपट्टणं विद्यते। यच्च - **"धन्विनव्यपुर"** मिति नाम्ना प्रसिद्धं वर्तते। तत्र श्रियः पतिः क्षीरसागरविहारी क्षीराब्धिं त्यक्त्वा धन्विनव्यपुरे वटपत्रशायिरूपेण विराजमानः विद्योतते। एतादृशपुण्यस्थले बोधायनसूत्रः यजुश्शाखाध्यायी पुरश्चूडः मुकुन्दाचार्याभिधः कश्चन भगवद्भक्तः पद्मवती नाम्न्या धर्मपत्न्या सह विराजते स्म। तयोर्दम्पत्योः वैनतेयांशेन एकः पुत्रः समजनि। कलियुगारम्भे सप्तचत्वारिंशत्तमे क्रोधिनामक वर्षे ग्रीष्मऋतौ ज्येष्ठमासे शुक्लैकादश्यां स्वातीनक्षत्र युक्त भानुवासरे पुत्रोऽयं प्रादुर्भूतः -

मिथुने स्वातिजं विष्णोः रथांशं धन्विनः पुरे।
प्रपद्ये श्वशुरं विष्णोः विष्णुचित्तं पुरशिखम्।। इति।

अनेन तावत् भगवन्तं नारायणमुद्दिश्य "तिरुप्पल्लाण्डु" इत्यारभ्य ४७३ गाथाः सुगीताः। यच्च "पेरियाल्वार्" तिरुमोलि नाम्ना प्रसिद्धं प्राप। अयमाबाल्यादेव वटपत्रशायिनः कृते पुष्पमाला- कैङ्कर्यं कुर्वन् तदर्थमेकं पुष्पोद्यानञ्च पालयन्नासीत्। भगवतः आज्ञया पाण्ड्यदेशराज्ञः

श्रीवल्लभदेवस्यास्थाने विष्णोः परत्वं संस्थाप्य विष्णुचित्त इति कीर्तिमवाप।

गोदादेवी

श्रीधन्विनव्यपुरक्षेत्रे भगवद्भक्तस्य श्रीविष्णुचित्तस्य पुष्पोद्याने भूदेव्याः अंशेन इयं जनिमवाप। कलियुगे अशीत्युत्तरनवतितमे नलनाम संवत्सरे कर्काटकमासे शुक्लपक्षचतुर्दशीमङ्गलवासरे पूर्वफल्गुणीनक्षत्रे इयं भक्तिमती समुद्भूता।

"कर्कटे पूर्वफल्गुन्यां तुलसीकाननोद्भवाम्।

पाण्ड्ये विश्वम्भरां गोदां वन्दे श्रीरङ्गनायिकीम्"।।

गोदा, आण्डाल्, चूडिक्कोडुत्तनाच्चियार् इत्यादीनि नामानि एनां विभूषयन्ति। **तिरुप्पावै** नामक दिव्यप्रबन्धं त्रिंशत्गाथायुतम्। **नाच्चियार् तिरुमोलि** नामकदिव्यप्रबन्धञ्च त्रिचत्वारिंशदुलरशतं गाथायुक्तं श्रीमन्नारायणमुद्दिश्य स्तुतवती इयम्।

श्रीविष्णुचित्तस्य सकाशात् नन्दनन्दनस्य वैभवं लीलाञ्चाकर्ण्य श्रीकृष्णे अनुरागवती सञ्जाता। तदारभ्य यथा गोपिकाः कात्यायनीव्रतेन श्रीकृष्णं प्रापुः तथैवेयमपि त्रिंशद्दिनात्मकव्रतानुष्ठानेन श्रीरङ्गनाथं पतित्वेन प्राप्तुं मनश्चकार। एषा हि प्रतिदिनं भगवतः कृते श्रीविष्णुचित्तेन निर्मितां मालां स्वयं धृत्वा दर्पणे स्व सौन्दर्यं पश्यन्ती अहं तस्य योग्या वा नवेति चिन्तयन्ती आसीत्। एकदा विष्णुचित्तः एतत्प्रकरणं विलोक्य सञ्जातखेदः तद्दिने भगवते मालां नादात्। रात्रौ भगवान् प्रत्यक्षीभूय "अद्य किमर्थं पुष्पमाला न समर्पिता मह्यमिति" पप्रच्छ। भट्टनाथस्तु जातं वृत्तान्तं निवेदयमास भगवते। श्रुतवृत्तान्तस्सः "तया धृता मालैव अस्माकमत्यन्तभोग्यवहा आस्वादनयोग्या च भवतीति इतः परं प्रतिदिनं तथैव करणीयमिति" विष्णुचित्तं समादिदेश। एवं सा गोदादेवी भगवतो भक्तिपरिपूर्णा, अनुरागवती भूत्वा अन्ते श्रीरङ्गनाथमेव परिणीतवतीति गुरुपरम्परासारानुसारं निश्चेतुं शक्नुमः। सांप्रदायिकश्लोकाः गोदादेवीमुद्दिश्य

प्रवर्तन्ते।

"नीलातुङ्गस्तनगिरितटीसुप्तमुद्बोध्य कृष्णं
पारार्थ्यं स्वं श्रुतिशतशिरस्सिद्धमध्यापयन्ती।
स्वोच्छिष्टायां स्त्रजिनिगलितं या बलात्कृत्य भुङ्क्ते
गोदा तस्यै नम इदमिदं भूय एवास्तु भूयः।।
श्रीविष्णुचित्तकुलनन्दनकल्पवल्लीं
श्रीरङ्गराज हरिचन्दनयोगदृश्याम्।
साक्षात्क्षमां करुणया कमलामिवान्यां
गोदामनन्यशरणश्शरणं प्रपद्ये"।।

गोदापरिणय चम्पूकाव्यस्य स्वरूपम् -

श्रीवेदाधिनाथभट्टाचार्येण केशवनाथेन ग्रथितमिदं चम्पूकाव्यं पञ्चधा विभक्तं विद्योतते। प्रायः चम्पूणां विभागः उच्छ्वासेषु, स्तबकेषु, उल्लासेषु, आश्वासेषु, काण्डेषु, तरङ्गेषु, विलासेषु, लम्बकेषु, कल्लोलेषु, मनोरथेषु च विभक्ता दृश्यन्ते। इदं हि स्तबकात्मना विभक्तं विद्यते। प्रथमस्तबकः, द्वितीयस्तबकः इत्यादि रूपेण।

प्रथमस्तबकविषयप्रस्तावः -

श्रीहयग्रीवय नमः इति वागधीशस्य भगवतः ज्ञानानन्दस्वरूपस्य सर्वविद्यानामाधारभूतस्य श्रीहयग्रीवस्य प्रणामं कृत्वा तदनु शिष्टाचारानुमितश्रुतिं बोधितकर्तव्यताकं मङ्गलमनुष्टुबेन छन्दसा प्रारभ्यते। यथा -

'कल्याणं करुणासारशीतलापाङ्गविक्षणैः।
कुर्वती पातु मां नित्यं गोदा वेदान्तदीपिका।।
गोविन्दानन्दजननीं कोमलार्थपदावलीम्।
गोदा ददातु मे वाणीं मोदाय कविचेतसाम्'।।

इति स्वेष्टदेवतायाः गोदायाः नमनमकरोत् कविः। अनन्तरं श्रीधन्विनव्यपुरस्य नगरविशेषवर्णनं, पाण्ड्यराज्ञः वैशिष्ट्यं, श्रीविष्णुचित्तस्यावतारः, पाण्ड्यराज्ञः सभायां विद्याशुल्कप्राप्तिः, भक्तस्य वैभवदर्शनाय भगवतः श्रिया सह गरुडवाहनमधिरुह्य तत्रागमनं, सर्वजनदृष्टिदोषनिवारणार्थं श्रीविष्णुचित्तस्य मङ्गलाशासनमित्येवमादयो विषयविशेषाः सुललितया रीत्या कविना वर्णिताः। पद्ये गद्ये च सर्वत्र कवेः पदलालित्यमास्वादयोग्यं विद्यते। प्राकृतिकसौन्दर्यवर्णने कविरयं सिद्धहस्त इति स्पष्टं ज्ञातुं शक्नुमः। गद्यमाधुर्यमेवं -

'यत्र च महिलानामलकमलिगुणेन भ्रूयुगलमपि कोदण्डेन लोचनमपि मत्स्यलाञ्चनेन निश्वासमपि निजेन रथेन ....' इत्यादिरूपेण विद्यते। अत्र प्रायः विविधछन्दस्सु प्रयुक्ताः षट्त्रिंशत् श्लोका वर्तन्ते।

द्वितायस्तबकविषयप्रस्तावः -

श्रीवैकुण्ठे भगवतः भूदेव्या सह वराहावतारविषयकसम्भाषणं, श्रीविल्लिपुत्तूर् नामकपट्टणे गोदारूपेण भूदेव्या अवतारः, वटपत्रशायिनः मालाकैङ्कर्यं, गोदाधृतमालाधरणे भगवतः अभिलाषप्रकटनमित्यादय विषयाः हृदयङ्गमया रीत्याऽत्र वर्णिताः। -

'उच्चस्थे ग्रहपञ्चके सुविशदे पक्षे सहस्रद्युतौ
प्राप्ते कर्कटकं सुयोगकरणे लग्ने तुलानामनि।
पञ्चम्यां दिवसस्य मध्यसमये मूले तुलस्याः भुवः
फल्गुन्योरथ पूर्वयोरुदभवत् ज्योतिः किमप्यद्भुतम्'।।

इति गोदाया अवतारदिनं सूचितम्। अत्र द्वात्रिंशत् श्लोकाः प्रायः वर्तन्ते।

तृतीयस्तबकविषयप्रस्तावः -

स्तबकेऽस्मिन् वसन्तऋत्वादि ऋतूनां वर्णनं मनोज्ञया रीत्या

कृतः। ऋतुषु जायमानविषयान् सुवर्णनेन कविः स्वकल्पनासामर्थ्यं प्रकटीचकार। एतादृशवर्णनं साहित्यरसिकानामत्यन्तानन्ददायकमित्युक्ते नास्त्यतिशयोक्तिः। उदाहरणतया -

'ऋतुराजस्य पुरतश्चन्दनाचलमन्दमारुतान्दोलिता चलितकुसुमकोरकस्तनकिशोरकललिता कुरवकलताचञ्चलचञ्चरीकालरुचिरालकासलयकिसलयकरा सलीलं ननर्तेव' इत्यादि।

चतुर्थस्तबकविषयप्रस्तावः -

स्तबकेऽस्मिन् हेमन्तऋतौ गोदया कृतव्रतानुष्ठानवर्णनं, कृष्णविरहपीडितगोदास्वप्नवर्णनमित्यादय विषया मनोहारिण्या शैल्या वर्णिता विद्योतन्ते। यथा -

'पस्पर्श यस्य चरणौ करपल्लवेन
पद्मालया भगवती बहुभिस्तपोभिः।
गोपीमनोनयनिञ्जनगोपवेशः
पाणिग्रहं स विदधातु पतिर्ममेति'।।

अयमपि पञ्चशरवञ्चकः पक्षपाती लक्षीकरोति मामेव बहुमुखानां शिलीमुखानां न तादृशं कितवम् इत्यादि
अत्र अष्टत्रिंशत् श्लोकास्सन्ति।

पञ्चमस्तबकविषयप्रस्तावः -

स्तबकोऽयं काव्यस्यास्य प्राणभूतः भवति। अत्रैव श्रीगोदाया अवतारनिदानं कथितम्। श्रीविष्णुचित्तः पुत्र्याः गोदाया अभिलाषं पूरयितुं-

'श्रीविष्णुचित्तोऽथ सहैव शिष्यैः
श्रीरङ्गसेवाविहिताभिलाषाम्।
सार्धं सखीभिश्चतुरन्तयान-
मारोप्य गोदामनघः प्रतस्थे'।।


इति रीत्या श्रीरङ्गक्षेत्रप्रस्थानमकरोत्। प्रस्थानमार्गे दक्षिणदेशस्य वैभववर्णनं, बह्वीनां नदीनां सौन्दर्यवर्णनं, बहूनां दिव्यक्षेत्राणां वैशिष्ट्यवर्णनं, विद्याशुल्कप्राप्तिप्रकारकथनं, बहूनां पुष्पाणां परिचयकथनं, श्रीरङ्गाधिपतिं वरत्वेन प्रार्थना, गोदारङ्गनाथयोः वैवाहिकवृत्तान्तवर्णनं, दाक्षिणात्यमाङ्गलिकक्रियाकलापवर्णनमित्येवमादयो विशिष्टविषयाः केशवकविराजेन हृदयङ्गमतया मनोज्ञया च शैल्या समुपवर्णिताः विद्योत। अत्र प्रायः पञ्चमस्तबके मुख्यभूताः केचन श्रीविष्णुचित्तः भगवन्तमित्थं प्रर्थयते -

'भगवन् ! निखिलकुलधर्माचारसंस्थापनचतुर ! त्वयेमामस्मात्कुलोचितेन विवाहेन परिणेतुं साम्प्रतमसाम्प्रतं, द्विजकुलोचितेन विवाहेन दैविकेनैव बालिका मे परिणेतव्या' इति। तदनु पाणिग्रहणमहोत्सवः, विष्णुचित्तस्य प्रार्थनया गोदया सह श्रीरङ्गनाथस्य 'श्रीविल्लिपुत्तूर' नगरे एव वासः, एवमादीनधस्तनश्लोकैः ज्ञास्यामः।

श्रीविष्णुचित्तः शिशिरैः पयोभिः
प्रक्षाल्य पादौ परमस्य पुंसः।
करे गृहीत्वा कमलामिवान्यां
कन्याञ्च तां गद्गदमित्यवादीत्।।
संवर्धिता तवैवेति सैषा रङ्गपते मया।
गृहीत्वा पाणिमस्यास्त्वं गृहमेधी सुखी भव।।
तस्याः मुखं वीक्ष्य समन्दहासं
तयेक्ष्यमाणश्च स राजहंसः।
करेण जग्राह करं तदीयं
करी करिण्या इव रङ्गधामा।।
सृष्टिस्थितिप्रलयकेलिविशारदस्य

लोकत्रयैकनिलयस्य हरेरमुष्य।
यः प्राप्तवान् श्वशुरतां किमसौ चकार
श्रीविष्णुत्तमुनिरालि! तपस्सुघोरम्।।
वैवाहिके तु नियमे विधिवत् समाप्ते
गन्तुं प्रवृत्तमथ तं समयाचतेति।
श्रीविष्णुचित्तमुनिरत्र हरे! मदीय
पुत्र्या सहैव वस मज्जन मङ्गलाय।।
स याचितश्चैवमशेषबान्धवैः
संवर्धयन् सर्वजनस्य मङ्गलम्।
उवास तत्रैव चिराय गोदया
श्रीरङ्गवासैकरसोऽपि माधवः।।

एवमेतत् पञ्चास्तबकात्मकं रसगर्भनिर्भरभरितं सहृदयहृदयानन्दजनकं सत्संप्रदायपरदीपकं, भक्तिरसप्रबोधकं, काव्यप्रमेयसुशोभितं गोदापुरोहितेन वेदाधिनाथभट्टाचार्येण श्रीकेशवनाथेन ग्रथितं **'गोदापरिणयचम्पू'** नामकं काव्यं संस्कृतकाव्यवाङ्मयान्तर्गतचम्पूप्रपञ्चे जाज्वल्यमानं विद्योतत इति शम्।



श्रीविष्णुचित्तकुलनन्दनकल्पवल्लीं
श्रीरङ्गराजहरिचन्दनयोगदृश्याम्।
साक्षात्क्षमां करुणया कमलाभिवान्यां
गोदामनन्यशरणश्शरणं प्रपद्ये।।

सङ्केताक्षरसूची

1. क - मूलोमातृका (acc. no. 12231, GOML., Chenni, Tamilanadu)
2. ख - acc. no. 12232, GOML., Chenni, Tamilanadu
3. ग - Acc. no. 6232, SVUORI., Tirupati, Andhra Pradesh
4. घ - Acc. no. 6256, SVUORI., Tirupati, Andhra Pradesh.
5. च - Acc. no. Baroda Oriental Manuscripts Library, Baroda, Gujarat.
6. * - तालपत्रं भग्नं जातं, **भग्नानन्तरविषय आरब्धश्च।
7. अ - अशुद्धपाठः
8. शु - शुद्धपाठः
9. Com - Complete.
10. GOML - Government Oriental Manuscripts Library.
11. Incom - Incomplete.
12. P - Paper Manuscript.
13. PL - Palm Leaf.
14. SVUORI - Sri Venkateswara University Oriental Research Institute.

श्रीहयग्रीवाय नमः

प्रथमास्तबकः

कल्याणं करुणाऽऽसारशीतलापाङ्गवीक्षणैः।
कुर्वन्ती पातु मां नित्यं गोदा वेदान्तदीपिका।।१।।

गोविन्दानन्दजननीं कोमलार्थपदावलीम्[1]।
गोदा ददातु मे वाणीं मोदाय कविचेतसाम्।।२।।

गोदापरिणयं वक्तुं तदादेशेन निर्भया।
चपला मम जिह्वेयं चम्पूमारभते बुधाः।।३।।

अस्ति प्रशस्ता दिशि दक्षिणस्यां
श्रीधन्विनव्येति पुरी पुराणि।
यद्वैभवो विष्णुपदाभिलाष[2] -
वार्ताञ्च दूरीकुरुते नराणाम्।।४।।

चन्द्रातपं रजतभित्तिमयूखमाला -
बालातपं क्वचन गोपुरहेमभासः[3]।
सन्ध्याञ्च यत्र गृहतोरणपद्मरागाः
कुर्वन्ति हर्म्यहरिनीलशिलास्तमांसि।।५।।

---

१. घ. पदावलिम्

२. घ. अभिलाषा

३. ख. भासम्

यत्र चारुणमणिकिरणैरेव निरस्तेषु समस्तेषु तमिस्रेषु सहस्रभानुर्विफलोदयोऽपि लीलासरसि सङ्कुचितपङ्कजदलकवाटपटलपाटनमात्रेण किञ्चित् सफलोदयो भवति।

यत्रालकेषु मुखचन्द्रमसो वधूनां
सान्द्रस्मितोल्लसितचन्द्रिकयाऽभिरामान्।
दृष्ट्वोन्मिषन्ति दिवसेष्वपि कैरवाणि
सम्मीलितानि च भवन्ति सरोरुहाणि।।६।।

यत्र च महिलानाम् अलकमलिगणेन[४] भ्रूयुगलमपि कोदण्डेन लोचनमपि लाञ्छनेन निश्वासमपि निजरथेन वाचमपि रत्यालापेन दशनमपि शरासनमणिना वदनमप्यमृतमयातपवारणेन कण्ठमपि विजयशङ्खेन कुचयुगलमपि मणिमकुटेन मध्यमप्यनङ्गभावेन पाणितलमप्यशोकपल्लवेन रुचिरोरुयुगलमपि निजोपवनकदलीविशेषेण जङ्घामपि निषङ्गेण चरणयुगलमप्यरुणनलिनेन सकलमवयवमपि नवनवमालिकया विधाय विधातृत्वमङ्गनासृष्टावनङ्ग एवाङ्गीचकार। स्रष्टुरेव सृष्ट्यधिकार इति मृषैव किं वदन्ती[५]।

हरिन्मणिश्यामलहर्म्यभाजो
यदङ्गना वीक्ष्य मुहुर्भुजङ्गाः।
सान्द्राम्बुदव्यूहसमीपखेल-
च्छम्पाभिशङ्का चकिता भवन्ति।।७।।

---

४. ख.ग.घ. अलकमलिगुणेन

५. ग.च. वदन्ति

६. ख. अनुपदमितराजानुवञ्चनोपायो

यत्र च अन्धतमसान्धीकृताशास्वपि निशासु निर्गतानामभिरमणभवनमभिसारिकाणामसितवसनावकुण्ठितशरीराणां प्रसवदलपिहितमणिनूपुरविवराणामप्यन्तिकगतस्फटिकवेदिकासौधसान्द्रकिरणचन्द्रातपेन कुन्तलगन्धलोभागतचञ्चलचञ्चरीकनिनदेनापि सूचितानामिव भयतरलानामनुपदमितरजनवञ्चनोपायो[६] भवति पर्यन्तमणिस्तम्भसमीपेषु सालभञ्जिकानामिवावस्थानम् ।

रहसि कृतरतीनां यत्र रात्रौ वधूनां
मधुरमणितनादान्मञ्जुलालापभेदान् ।
परिचितजनवाचां पञ्जरस्थायिनीना -
मनुवदति शुकीनां शारिकाणाञ्च पङ्क्तिः ।।८।।

यत्र च ललना एव विजयसेनास्सरसशरासनस्य शासनातिलङ्घिनं[७] जनमवबध्य बाहुलतापाशैरधिरोप्य कुचशैलदुर्गमभिसन्ताड्य कटाक्षकशाभिरनवरत[८] स्नेहार्द्रहृदयमधरामृतैराश्वास्य पुनरपि स्ववशयन्ति[९]।

मन्दाकिनीसलिलशीकरशीतलेन
मन्दारसौरभवता चलितेन यस्याम् ।
मन्दानिलेन सदृशां मणिहर्म्यभाजां
मन्दायते ललितकन्दुककेलिखेदः ।।९।।

---

७. ख. शासनातिलङ्घनम्

८. च. कशाभिरभिनव

९. ग. स्ववशयन्ती

यत्र च वनितानामतिगभीरनाभिनद[१०]मतिलङ्घ्य कथमपि त्रिवलिविषमेण तनुरोमराजिपथेनातिनिबिडं कुचभरकुलशैलयोरभ्यन्तरं गतानि कुङ्कुमपङ्कपतितानि हारवल्ली[११]परिवेल्लितानि युवजनमनांसि यौवनवने चरन्नसमशरचोरः प्रसह्य निगृह्यापहरति धैर्यसर्वस्वम्।

बिम्बाधरं दृशमपि प्रविवेश यत्र
वामभ्रुवाममृतमब्धिभवं विषञ्च।
नूनं तयोस्त्रिभुवनेष्वपि किं वदन्ती[१२]
मात्रं सुरेन्द्रपुरशङ्करकण्ठवासः।।१०।।

यत्र च सुन्दरीणामतिसुन्दरेण वदनेन्दुनैव विहिताभिषङ्गे मृगाङ्के तदसहमानास्तारका एव हारमणिमिषेण पयोधरमहामहीधरशिखरमधिरुह्य सुरतकलहेषु सरभसममन्ददष्टाधरोष्ठवेदनाविधूतकरपल्लवेषु चलशङ्खवलयरणितश्छलेन कृताक्रन्देष्वपि सममेव नतनाभिनदे[१३] निपतन्ति[१४]।

यत्सौधजालशिखरप्रभया विवस्वान्।
चन्द्रायते सततगौरशरीरकान्तिः।
यद्रत्नमन्दिर[१५]भुवां महसां समूहै -
रिन्दुस्तथारुणवपुस्तपनायते च[१६]।।११।।

---

१०. ग.घ.च. गम्भीरनाभीनद

११. ख.ग.घ.च. हारवल्लि

१२. च. वदन्ति

१३. ख.च नाभीनदे, ग.घ. नतनाभीनदे

१४. घ. निपतन्ती

१५. ख. यदुत्तममन्दिर

१६. च.स

यत्र च विलासिनीषु तिमिरं[१७] ससौरभं तिमिरवहमपि शशिनमसितजलजमप्यमृतविषमिलितमरुणरागरेखामपि तरुणचन्द्रातपमञ्जरीरञ्जितां कुमुदमपि[१८] ललितशुकलपितसहितं कम्बुमपि कपोतनादगर्भं वेणुमपि सप्रवालपद्मरागं शैलयुगलमपि सपुलकमधिगगनमहिमकरदुहितरमपि[१९] पुलिनमपि कदलीयुगलोपरिगतमरुणनलिनमपि कृतमृदुगतिविशेषं विरचितवतो विरिञ्चस्य प्रपञ्चविचित्रसृष्टिचातुर्यमस्तीत्यनुमीयते।

आलोक्य रूपमतिमानुषमङ्गनानां
यत्रैव चित्रमिथुनान्यतिविस्मयेन।
नूनं भवन्त्यनिमिषाणि गृहे गृहे च
पादौ निधातुमपरत्र भजन्ति मोहम्।।१२।।

यत्र च विचित्ररत्ननिशान्तेषु निशान्तरेषु कान्तैरपहृतवसनान्तानां कान्तानामूरुमूलचपलाक्षेषु लीलादक्षेषु तेषु मन्दाक्षेण सपदि निर्वापितास्वपि दीपिकासु मणिप्रदीपभासुरे सति गृहोदरे पुनरासामभङ्गुरपुलकाङ्कुरैरतितुङ्गैरेव[२०] कुचशृङ्गैस्तदालिङ्गनमेवाभवदनिवारणमावरणम्।

क्षोणीवयाकनकगोपुरमद्रिराजः
पर्यन्तहर्म्यपटलानि कुलाचलेन्द्राः।
पुण्यापगास्फटिकवीथिपरम्पराश्च
प्राकारभित्तिरपि[२१] राजति चक्रवालः।।१३।।

---

१७. घ. तिमिरमपि

१८. ख. कुन्दमपि

१९. च. सपुलकं गगनमप्यहिमकरदुहित्रसहितम्

२०. ख ग.च. पुलकाङ्कुरैरतितुङ्गैः

२१. मूलमातृकायामन्यपाठः - प्राकारभित्तिरभि

यत्र च अच्छस्फटिकोपलकृतसङ्केतगृहोदरं पुरोगतासु मनोहितासु सर्वतः प्रतिबिम्बिताङ्गीषु तन्वङ्गीष्वानङ्गबाणविवशा युवानस्सन्दिहानास्तत्प्रतिबिम्बेषु समीपगतमणिस्तम्भसालभञ्जिकाकदम्बेषु लम्बालकेति धिया समवलम्बितुं सममेव प्रसारयन्ति करान्। यत्र च निशासु कापि शायनमदविवश्कानां[२२] सुदृशामवशनिद्रा[२३]समये वदनामृतकिरणलावण्यं मणिमयजालमार्गप्रसारितैरात्मकरैरपहृत्यापहृत्य[२४] चन्द्रश्चौर्यजनितपातकमिव सदा वहति मलिनमङ्गे न[२५] कलङ्कम्। यस्याश्च परिघाजलरुहाण्यरविन्दोत्पलानि चन्द्रमुखीनामाननविलोचन-विनिर्जितान्यपि मत्सरेण रिपुजयाय सालमारुह्य[२६] युद्धोन्मुखानीव रोचन्ते। यस्याश्च कनकसालरशनाकलापमभितः कालिकालिरुचिरुपवनपालिका विलसति परिहितमिव वसनमानलम्[२७]।

शाखामृगाकम्पितचूतजम्बू
शाखापतत्पक्वफलद्रवेण।
नित्यं नदीमातृकतां[२८] भजन्ते
यस्यास्समीपोपवनप्रदेशाः।।१४।।

---

२२. ख. मद्विवशानां, ग.घ.च. मदविवशानां
२३. ख. सुदृशमवनिद्रा
२४. च. करैरपहृत्यासंहृत्यानाम्
२५. च. न इत्यक्षरं नास्ति
२६. च. सालमारुध्य
२७. ख.ग.घ.च. वसनमानीलम्
२८. च. नदीनामकताम्

यस्याश्च नातिदूरे कुत्रचिद्विचित्रतरं बहल[२९]वकुलमरीचिनिचयपनस-तिमिरवटविटपिपाटलपटलचूतकेतकस्यान्नाग[३०]पुन्नागकुन्दतिन्दुक-चन्दनबृन्दक्रमुकमधुकनालिकेरपालिका जम्बूजम्बीरकादम्ब-कदम्बक[३१]चम्पकतक्कोलकृतमालतमालामल[३२]कैलाल[३३]वङ्कसङ्कुलच्छाया सुभगशाखापिहिततरणिकिरणसरणिं मदन इव[३४] रतिमदविलासकरं नन्दनमिव धृतहरिचन्दनं सुन्दर[३५]वदनमिव तिलकसुन्दरं बृन्दारकनगरमिव रम्भाभिरूप्यसम्भावितं मलयप्रकम्पनकृततरुकम्पं चम्पकारण्यमित्यशरण्यशरण्यमस्त्यरण्यं या च सुमेरुसानुरिव विचित्ररत्नवती[३६]। दुग्धसागरवेलेव मधुरिपुणा अधिशयिता सुधर्मेव विद्याधरसमाश्रिता चन्दनाटवीव भोगिकुलवसतिरिक्ष्वाकुकुलकीर्तिरिव भरतरामालङ्कृता रामकथेव बहुमुखपुण्यजनोपेता सुरभिरिव निखिलकामदुघा युवतिरिव सर्वजनहृदयङ्गमा कृष्णलीलेव कीर्तयतां पापनाशिनी मधुसूदनोरस्थलीव[३७] कमला विहारा भूमिरभूत्[३८]।

---

२९. ख.ग. बहुल

३०. च. चूतकेतकनागस्यान्नाग

३१. ख. क्रमुकनालिकेलपालिका मधूकजम्बुजम्बीरकदम्बकदम्बक

३२. च. चम्पकतक्कोलाङ्गूलकृतमालतालतालतमालामल

३३. ख.ग. खेलाल

३४. ख.ग.घ.च. मदनवपुरिव

३५. च. सुन्दरी

३६. घ. विचित्ररत्नवति

३७. ख.ग.घ.च. मधुमथनोरस्थलीव

३८. च. विहारभूमिरभूत्

वटेश्वरपुराख्यया मुनिभिरीरिता यात्वभूत्
पुरा तदनु धन्विना शबरवंशजातेन सा[३९]।
नवीकृतमहोदया पुनरभूत्तदीय्याख्यया
प्रसिद्धनिजवैभवा जगति धन्विनव्येति च।।१५।।

किञ्च[४०]।

तस्यामभूत्तनुभृतां भुवि मुक्त्युपाया-
नादेशतो मुररिपोरथ[४१] दर्शयिष्यन्।
तार्क्ष्यस्वयं द्विजवरस्य मुकुन्दनाम्नः
श्रीविष्णुचित्त इति शान्तगुणस्तनूजः।।१६।।

अपि च[४२]।

हर्तुं तमस्सकलदेहभृतामबाह्यः[४३]
विष्णोः पदं प्रविशितुं[४४] निजगोविलासैः।
श्रीमान्मुकुन्दजलधेरुदयं प्रपेदे
श्रीविष्णुचित्त दिनकृज्जगदेकमित्रः[४५]।।१७।।

यश्च शिशिरकिरण इव कलाधरः तापन इव पादसञ्चारपवित्रीतधरणीतलः पवन इव सदागति कृतादरः गाङ्गेय इव

---

३९. ख.ग.घ.च. - च

४०. किञ्च इति पदं 'च' मातृकायामेव वर्तते

४१. ख. मुररिपोरनु

४२. ख. 'अपि च' इति पदं नास्ति

४३. ख.ग.घ.च. मबाह्यम्

४४. पथयितुम्

४५. ख.ग.घ. जगदेकमित्रम्

सत्यव्रतः कमलासन इव वाणीविलासी[४६] राजहंस इव सारासारविवेकचतुरः पारिजात इव सुरेशसुमनःप्रदायी पराशर इव दर्शितभगवश्छुभाचारः कुम्भयोनिरिवालङ्कृतदक्षिणाशामुखः कौस्तुभ इवानुरञ्जितमुकुन्दहृदयो मारुतिरिव विजिताक्षः निर्जरजन इवामृतरसकुतूहली निरवधिकमहिमाऽभूत्।

हरिं लक्ष्मीभूम्योः करकिसलयामृष्टचरणं
शयानं भोगीशे शशितपनपङ्क्षायुधवरैः।
सनाभीपद्मस्थद्रुहिणमधुपेनापि सततं
कृतस्तोत्रं ध्यायन्नभवदितराशासु विमुखः।।१८।।

स च ब्रह्मविदग्रेसरो ब्रह्मचर्याश्रममेव परमाश्रमं मन्वानो धन्विनूतनपुराधिनाथस्य तस्यैव देवदेवस्य वटमहाधाम्नो निरवधिकगुणधाम्नो वरमनुपमानं विमानमतिभासुरं[४७] गोपुरमत्युन्नताकारं प्राकारं हाटकमयं कवाटमपहृतजनमानसं महानसमपरिमितजनाश्रयं जनाश्रयमपजित[४८] शतपत्राण्यातपत्राणि चामि[४९]करमयानि चामराणि नैर्मल्यविजिताम्बराण्यम्बराणि अपहसितनन्दनवाटिकामाराम-वाटिकाममरयुवतिरिव[५०] भूषितस्त्रीयुता[५१] दासीश्शातकुम्भमय-

४६. घ. वाणीविलासः
४७. च. विमानमभिभासुरम्
४८. च. जनाश्रयमपहित
४९. च. चामी
५०. ग.च. वाटिकाममरयुवतीरिव
५१. ख.ग.घ. भूषिता भूषिता, च. भूषिता
५२. ख. वाद्या

कुम्भाननवद्यानि वाद्यानि[५२] च सम्पाद्य या या वरस्तदाराधनतत्परोऽभूत्[५३]।

काले तस्मिन् कलिकलुषितं कालमालोक्य भीतो
राजा पाण्ड्यो निशि च[५४] मधुरां शोधयिष्यन् पुरीं स्वाम्।
तस्यां पुर्यां द्विजवरशुभाचारसंवीक्षणार्थं
वेषश्छन्नो निजपरिजनानभ्युपेतः प्रतस्थे।।१९।।

वीथ्यां वीथ्यां तमसि विचरन् चत्वरे चत्वरे च[५५]
स्थित्वा स्थित्वा चरितमनघं मन्दिरे मन्दिरे च।
ज्ञात्वा ज्ञात्वा स्वपुरिवसतां[५६] सर्वसम्पत्समृद्धिं[५७]
पश्यन् पश्यन्नुदितपुलको[५८] भूपतिस्सञ्जहर्ष।।२०।।

तदा निशीथे करधृतखड्गखेटकशरासनसायकानां यामिकानां कालायसशङ्कुसङ्कुलितगदा किलकिल[५९]नादश्रवणेन तदागमनमार्गं परिहृत्य कस्यचिद्द्विजस्य बाह्यवेदिकायां निभृतं निवसन्नरपतिरन्तिकगतेन दूरदेशागतेन[६०] पथिकसार्वभौमेन भागीरथिमवगाहितुं प्रस्थितेन तृणीकृतदेहसौख्येनाख्यातं भारतप्रख्यातं वर्षार्थमिति[६१] पदाद्यं पद्यं शुश्राव।

५३. च. च सम्पाद्य धरासुरवरः तदाराधनतत्परः

५४. ख. स

५५. च. चत्वरेऽसौ

५६. ग. पुरनिवसताम्, च. पुरिनिवसताम्

५७. ग.घ. समृद्ध्यम्

५८. ख.ग. दर्शं दर्शं जनितपुलको, घ. पश्यन् पश्यन्नुदितिपुलको

५९. च. किलिकिलि

६०. ख.ग.घ.च. दूरदेशादागतेन

६१. घ.च. वर्षार्थमष्टौ प्रयतेत मासान् निशार्थमध्यं दिवसं यतेत।
वार्धक्यहेतोर्वयसा नवेन परत्रहेतोरिह जन्मना च।।

श्रुत्वा श्लोकं श्रवणसुभगं जातनिर्वेदचेता -
स्सद्यो राजा गतिमपि परां चेतसा चिन्तयानः।
गत्वा चान्तः पुरमधिमणिस्फीततल्पं शयानो
निद्रामुद्रारहितनयनो यापयामास रात्रिम्।।२१।।

मागधामधुरवेणुवल्लकी -
निक्कणैश्श्रुतिसुखैरबोधयन्।
झङ्कृतैस्तमुषसीव षट्पदा
राजहंसमरविन्दशायिनम्।।२२।।

तारावधूस्समनुभूय निशामशेषां
निद्राविरामविवशश्शयितुं किलेन्दुः।
आशिश्रये विगलदंशुक एव वेगा -
श्छैलेयगन्धिचरमाद्रिशिलातलानि।।२३।।

सन्तोषहास इव शक्रदिगङ्गनायाः[६२]
प्रत्यागते दिनकरे परिपाण्डुतासीत्।
तत्पीवरस्तनतटोपरि लिप्यमान
कालेयपङ्करुचिरप्यरुणोदयश्रीः।।२४।।

गगनतलस्फटिकमण्टपे शिशिरकिरणानुभूतायाः विवस्वदागमनभयवेगविनिर्गतायाः विभावर्याः शिथिलतिमिरकबरीभार-

---

६२. ख. सन्तोषहासजनितेन्दु दिशामुखे किं

६३. ख. अम्बरमणेः इति पदं नास्ति

विगलितकुसुमकोरका इव तारकाः भगवतस्त्रयी तनोरम्बरमणेर[६३]नुप्रवेशाय सरभसमरुणकरैरानीयन्त[६४]।

नाभीसर[६५]स्समुदितं नलिनेक्षणस्य
शोणारविन्दमिव सिन्धुशयस्य जृम्भत्।
उच्चैरुदस्तमिव कान्तिमदूर्मिवेगा -
न्माणिक्यमेकमुदधेरुदियाय भानुः।।२५।।

अम्भोजिनीरमणाशातकुम्भ[६६]कुम्भाभिमुक्तं[६७] कुङ्कुमसलिलमिव[६८] बालातपः प्रसर्पन् विरराज गगनाजिरे। स च पुनरबलानां सिन्दूर इव कुन्तलेष्ववतंसकिसलय इव श्रवणेषु[६९] हरिद्रालेप इव कपोलेषु यावकरस इवाधरपल्लवेषु प्रवालमालेव कण्ठेषु कुङ्कुमचर्चेव कुचपङ्कजकोशेषु कौसुम्भाम्बरमिव नितम्बेषु निलीनो बालातपश्शुशुभे।

सन्ध्यामुपास्य नृपतिस्सनरेन्द्रचिह्नै-
श्छत्राभिषेकसितचामरभूषणाद्यैः।
संशोभितस्सचिवदत्तकरावलम्बी
सभ्याश्रितां[७०] कनकरत्नसभां विवेश।।२६।।

---

६४. क. करैरनुनीयन्त, ग.घ. करैरपानीयन्त, च. किरणैरपानीयन्त
६५. च. नाभीरस (वर्णविपर्ययः)
६६. च. कुम्भमय
६७. ख.ग.घ. विमुक्तः
६८. ख.ग.घ.च. कुङ्कुमसलिलप्रवाह इव
६९. च. श्रवणे
७०. ख.ग.घ.च. सभ्याश्रताम्

वृत्तागमज्ञानथ वीक्ष्य सभ्या -
न्वृत्तान्तमावेद्य च रात्रिजातम्।
पप्रच्छ पाण्ड्यः परतत्वबोधे
कुतूहली गोत्रभिदा समानः।।२७।।

विरिञ्चः किं तत्वं विरचयति यो लोकमखिलं
प्रपञ्चं यो रक्षत्युदधिशयनः किन्नुसपरम्।
पुराम्भेत्ता किं वा भुवननिवहंसं हरति यो
न जाने शास्त्रज्ञाः[७१] प्रशमयत मे संशयमिमम्।।२८।।

इत्याकर्ण्य नरेन्द्रभाषितमिदं सभ्याश्च तत्त्वं परं
निश्चेतुं विवदन्त एव बहुधा तन्निश्चयार्थं पुनः।
मन्त्रैर्व्योम्नि निबध्य शुल्कमवदन् ते[७२] संविदं[७३] यः परं
तत्वं निश्चिनुते तदस्य निपतेश्छुल्कञ्च पाणाविति।।२९।।

काले तस्मिन्नथ वटमहाधामनामापरत्वं
स्वस्यैवेति प्रचुरकृपया प्राह विष्णोः परत्वम्।
नान्यस्यास्ति स्फुटमिति वदन् पाण्ड्यभूपालगोष्ठ्यां
विद्याशुल्कं हर तदधुना विष्णुचित्ताञ्जसेति।।३०।।

मत्प्रभावेन तव वेदसार्थास्सार्थास्समधिगता[७४] भवन्त्विति च भगवता नियुक्तो विष्णुचित्तस्तत्र गच्छन्नेव मधुराममरावतीमिव प्रविश्य

---

७१. ग. शास्त्रिज्ञाः

७२. च. शुल्कमवदंस्ते

७३. च. संविदा

७४. ख. वेदसार्थास्समधिगता

सुधर्मानिभायां सभायां तत्र सिंहासनाधिरूढं सिंहमिव कनकशिखरिशिखरगतमवनतनिखिलनरपतिमणिमकुटशाणोपल-निघर्षणदीप्तचरणनखमणिश्रेणिं वलयविघटितवलरिपुकिरीटं हाटकगिरिकटकशिलातलप्रकटविलिखितमीनलाञ्छनं मृगलाञ्छनगोत्रतमालपत्रं वेत्रलताभिहत[७५]विषमलोचनगात्रं कारागृहचिरस्थापितधाराधरं मणिनूपुरद्वयसप्तसागरसलिलमध्यं चतुर्णवमेखलावल्लभं श्रीवल्लभं नारायणमिव मुनीनामिन्द्रमिवामराणां चन्द्रमिव तारकाणां[७६] सभास्ताराणां मध्यगतं[७७] शरीरबन्धमिव धर्मस्य समवायमिव पुण्यानां सन्निधानमिव शान्तेस्सङ्केतस्थलमिव सुमतिविवेकयोस्सारमिव सौन्दर्याणां परिणाममिव पराक्रमाणां निदर्शनं करुणायाः निवासं नीतिविचाराणां प्रभवाचलमिव कीर्तिनदीनां श्रृण्वन्तं पुराणकथां विचिन्वन्तं परगतेरुपायमाजानुबाहुं राजानमद्राक्षीत्।

किं नारदः किन्नु पराशरोऽसौ
व्यासश्शुकोवेति विलोक्य राजा।
श्रीविष्णुचित्तं जगदेकवीरो
मुहुश्शशङ्के मुदितान्तरात्मा।।३१।।

प्रत्युत्थाय पुरोधसा सह नृपः प्रीतः प्रणम्यादरा -
दध्यारोप्य तदासनं विधिकृतैरर्घ्यादिभिः पूजयन्।

---

७५. ख. लताभिहित

७६. ख.ग.घ.च. ताराणां

७७. क. मध्यं गतं, ग. मध्यागतं

विद्याशुल्कनिबन्धनं समवदद्विद्वज्जनैः कल्पितं
वेदान्तैरपि मृग्यमाणविभवब्रह्मावबोधोत्सुकः।।३२।।

श्रुत्वा तन्नृपतेर्वचश्श्रुतिशतैरन्यैः प्रमाणैरपि
स्मृत्याद्यैरखिलान्विजित्य कुमतीन् बाह्यान् कुदृष्टीनपि।
श्रीमानेव हरिस्समस्तजगतां नाथः परस्मात्परो
रक्षादक्ष इति ब्रुवन् स सहसा जग्राह शुल्कं मुनिः।।३३।।

विद्याशुल्के सह नरपतेस्संशयेनैव तस्मि -
ञ्छिन्ने सद्यो विजितविदुषा विष्णुचित्तेन तेन।
वाद्यध्वानो मुखरितदिशामण्डलस्तद्यशोभि-
स्सार्धं भेजे त्रिदशनगरव्योमयानाग्रशृङ्गम्।।३४।।

तमथ राजापि गजराजाधिरूढं भट्टाधिराज इति कृतपट्टबन्धनमष्टापदमणिमयभूषणभूषितसर्वाङ्गमुत्तमाङ्ग-धृतमणिमकुटद्योतित[७८]मुक्तातपत्रं चामीकरमयदण्डचामरयुगलालङ्कृतो-भयपार्श्वमनुगच्छदश्वगजपदातिं पदातिस्सन्नभिहतमृदङ्गरवमुखरितदि-गन्तरान्निज मन्दिर[७९]हर्म्यान्तराधिरुढपुरसुन्दरी नयनेन्दीवररुचि-विरचितेन्द्रायुधरुचितोरणा[८०]मुच्छ्रितपताकिकाच्छादितरविकरिणसञ्चारां नगरवीथी[८१]मभितस्सञ्चारयन्ननुसञ्चचार[८२]।

---

७८. ख. द्योत

७९. च. मन्दिरमहा

८०. ग.घ. रुचिरुचितोरणा, च. रुचिरुचिरतोरणा

८१. ख. नरवीथि, ग. नगरवीथि

८२. च. सञ्चार

आविर्बभूव भगवानधिरुह्य तार्क्ष्य-
मालोकितुं कमलया सह विष्णुचित्तम्।
दन्तावलस्थमिव दैववशादुपेत
साम्राज्यचिह्नमकुटं पितरौ कुमारम्।।३५।।

ततश्च विहगकुलपतिकनकशिखरिवरशिखरनिलयममलतर-मरतकमणिकिरणमुरसि कृतवसति युवति विलसदचिररुचिमधिगत-धनुषमभिनवमिव जलधरमनुकम्पामृतवर्षिणं तमालोक्य त्रैलोक्यनाथं पुनःपुनः प्रणम्यातिप्रहृष्टो भट्टनाथस्तस्य च[८३] कमलालयानुरूप[८४]-रूपसम्पदमवेक्ष्य निरीक्षमाणस्वेतरजननयन-मोह[८५]दोषभयेन चण्डांशुरुचिरुचिरोभयघण्टाद्वयमेव[८६] तालयन्त्रभङ्गमङ्गलाशासन[८७]मकरोत्।

अत्यद्भुतं तद[८८]वलोक्य चमूचराणां
श्रीवल्लभस्य नृपतेरपि विस्मितस्य।
गात्राणि हर्षपुलकैस्समलङ्कृतानि
नेत्राणि बाष्प[८९]सलिलैरपि पूरितानि।।३६।।

---

८३. ख.ग.घ.च. 'च' इति वर्णः नास्ति
८४. ख. कमलालयानुकूलरूप
८५. ख.ग.घ.च. मोह इति पदं नास्ति
८६. ख. चण्डांशुरुचिरिभं
८७. ग. तालयन्त्रभं कुरमङ्गलाशासन, च. तालयन्त्रभङ्गुरमङ्गलाशासन
८८. ग.घ.च. तम
८९. ख. पुष्प

जित्वेत्थं दुर्विनीताननुपदमयथावादिनो वादिनस्ता -
न्विद्याशुल्कञ्च हृत्वा स समिति विदुषां धूततर्के[१०] च वर्गे।
विज्ञातार्थेन राज्ञा विनयनतिमता पूजितो विष्णुचित्तो
भूयःश्रेयस्करीं स्वामभजतनगरीं धन्विनव्याभिधानाम्।।३७।।

इति श्रीगोदापुरोहितेन वेदाधिनाथभट्टाचार्येण श्रीकेशवनाथेन विरचिते गोदापरिणयचम्पूकाव्ये प्रथमस्तबकः । गोदायै नमः।।

१०. ख.ग.घ.च. वीततर्के

द्वितीयः स्तबकः

काले च तस्मिन् कलशाब्धिमध्ये
कान्तं श्रियः कल्पितयोगनिद्रम्।
उद्बोद्य लोकेश्वरमुत्पलाक्षी
वसुन्धरा वाचमिमामुवाच।।१।।

पूर्वं वारिनिधौ वराहवपुषा मग्नां समुधृत्य मा -
मङ्के ना(रा)थ निधाय सर्वसुकरो मुक्तेरुपायस्त्वया।
मालागेयसमर्पणं मम सदेत्युक्त[१]स्तमेवाधुना
जाताऽहं भुवि दर्शयामि भविनां त्वं देह्यनुज्ञामिति।।२।।

इत्युक्तवाचं प्रणयावलोकै-
रिन्दीवराभामनु[२]गृह्य देवीम्।
पादारविन्दं करपल्लवाभ्यां
परामृषन्तीं हरिराबभाषे।।३।।

साधु साधु सर्वं सहे त्वया सर्वजनवात्सल्यानुगुणमेव[३] साम्प्रतं सञ्चिन्तितम्। अस्मन्मनोरथानामप्यनुरूपा चेयमभ्यर्थना। तदद्य खलु निवसति मन्नियोगेन महीतलावतीर्णस्सुपर्णो विष्णुचित्तनामा[४] धन्विनव्याभिधाने नगरे।

तस्यैवारामभूमौ वरतुलसिलतामूलतः पञ्चवर्षा
प्रादुर्भूता तदीये वसुमति भवने वर्धमाना सखीभिः।

---

१. ख. सदेत्युक्तम्

२. ख. इन्दीवरा तामनुगृह्य, च. इन्दीवरक्षीमनु

३. ख.ग.घ. वात्सल्यस्यानुगुणमेव, च. सर्वजनवात्सल्यस्यानुग्रहण्यमेव

४. च. विष्णुचित्ताभिधानो

आस्व त्वत्पाणिपद्मग्रहणमहमहं कर्तुमागत्य साक्षा -
न्मालामप्यङ्गरागानपि तव मधुरं गेयमङ्गीकरिष्ये।।४।।

इति निगदितवता तेन गाढमालिङ्ग्य कथमपि मुक्ता भर्तुरङ्गमप्यपहायापन्नपुत्ररक्षणपरेव जनयित्री धरित्री रक्षितुमखिलानपि जनानतिमुग्धान् दुग्धसागरान्निरगात्। तस्मिन् क्षणे च[५] मुकुन्दनन्दनो मुनिरपि नन्दनसङ्काशामभिनवकुसुमधूलीधूसरकेसरसहकार-कर्णिकारमल्लिका गिरिमल्लिका कुरवकमरुवकचारुतरनमेरु[६]तरुसौवीर-करवीरफलपूर[७]कुटजलिकुचयूथिका[८] नवमालिका[९] जितपुष्पजातिफलिनी नलिनी विशदकुमुदोत्पलसुगन्धिसौगन्धिकादिभिरलङ्कृतां[१०] वेशवाटिकामिव पल्लव[११]मनोहरामनङ्गतूणीमिवान्तर्दर्शितपुष्पशिलीमुखां सुरनगरीमिव सुरभिगुणमहितां वसन्तलक्ष्मीमिव माधवामोददायिनी-मात्मनोपचितामपजितविचित्र[१२]चैत्ररथपरिपाटिकामारामवाटिकामवजगाहे।

आद्या निषद्या खिल सौरभाणा -
मापानशालामधु[१३]पाङ्गनानाम्।
आसीच्छया कोकिलबालकाना -
मालापविद्याभ्यसनैकशाला।।५।।

---

५. ख. व, ग.घ.च. 'च' इति वर्णः नास्ति
६. च. सुमेरु
७. ख.ग.घ.च. करवीरमालूरफलपूर
८. ख.ग.घ.च. कुचमधूकयूथिका
९. ख. नवमल्लिका
१०. घ.च. सौगन्धिकैरलङ्कृताम्
११. च. फुल्लपल्लव
१२. ख. 'विचित्र' इति पदं नास्ति
१३. ख.ग.घ.च. आपानभूमिर्मधु

तस्यामेव महामुनौ तत इतः पुष्पापचायोद्यते
मूला वालतलं महीरुह ततेः सिञ्चत्सुशिष्येष्वपि।
पौराणां परिपूरयन् श्रुतिपथं बालानपि त्रासयन्
निस्वानस्तुलसीवने समुदभूत्कश्चित् क्षितेः स्फोटतः।।६।।

उद्विग्नसारसमुदञ्चितपक्षिजाल-
मुत्सर्पिषट्चरणमुच्चलराजहंसम्।
उद्भ्रान्तकोककुलमुद्गतकोकिलान्त -
दुद्यानमाशुनिनदेन बभूव तेन।।७।।

परिपूरितपौरचन्द्रशाला
विवरं भूमिविदारनिस्वनं तम्।
अवकर्ण्य जगाम तत्र भीतः
सहशिष्यैस्सहसा मुकुन्दसूनुः।।८।।

उच्चस्थे ग्रहपञ्चके सुविशदे पक्षे सहस्रद्युतौ
प्राप्ते कर्कटके[१४] सुयोगकरणे लग्ने तुलानामनि।
पञ्चम्यां दिवसस्य मध्यसमये मूले तुलस्या भुवः
फल्गुन्योरपि[१५] पूर्वयोरुदभवज्ज्योतिः किमप्यद्भुतम्।।९।।

तस्मिन्महसि समुदिते भगवतो विष्णुचित्तस्य सहचित्तेन विदिशोऽपि[१६] दिशः[१७] प्रसादमशिश्रियन्।

पार्श्वस्थिता लता मन्दपवमानेन कम्पिताः।
मुमुचुः पुष्पजालानि हर्षबाष्पकणानिव।। १०।।

१४. क.ख.घ कर्कटकं
१५. ख.ग. रथ
१६. विदिशो
१७. ध. दिशा

उवाह बाहुः पुलकानुबन्ध-
मुद्वाहमागामिनमेव मत्वा।
तस्यां[१८] विशेषादपि[१९] रङ्गभर्त्तु-
रासन्[२०] दिशि स्निग्धतराः कटाक्षाः।।११।।

तेन च मुनिना तस्मिन्नेव महसि विस्मापयन्ती काल[२१]बालशशिनमाक्रमितुमभितः पतितमन्धकारपटलमिव कैशिकमानीलकबरघनगलितां करकालिमिव कुटिलालकाग्रलग्नामतिधवलमौक्तिकपङ्क्तिं वहन्ती ललितललाटतटचन्द्रलेखामिव भ्रूलेखामायुधशिक्षणार्थमनिशमभ्यर्णवर्त्तिकर्णगर्त[२२]विषमशर[२३] धानुष्कविमुच्यमानमन्तर्गत[२४]कनीनिका[२५] मधुकरमसितोत्पलबाणमिव लोचनकोणं वहन्ती मुग्धमुखमण्डललक्ष्मीदीप(पि)कामिव नासिकामतिमधुर वागमृतबिन्दूनिव दन्तानशेषशरीरलावण्यसुधासिन्धुसमुदितवदनेन्दुबिम्बलीलां[२६] विद्रूमलतामिवैकामधरलेखामाननराकानिशाकरसहितमहिमकरमिवैकमरुणमणिताटङ्कमपरमपि तदुत्पातसूचनाय समुदितमिव पार्श्वसूर्यमखिलशंखसंघेन कण्ठशङ्कस्य समुपनीतमुपहारमिव हारं हरिनीलमणिवलयमधुकरावलिविलसितामरुणपाणितलप्रवालामभिनवनखरकुसुमसुन्दरां हरिचन्दनालिङ्गनोत्सुकां कल्पलतामिव

१८. ख.ग.च. आसन्
१९. ख.घ. अथ
२०. ख.ग.च. तस्याम्
२१. च. फाल
२२. ख.ग.घ.च. गर्ते
२३. च. विषम
२४. च. धानुष्कविमुच्यमानान्तर्गत
२५. ग. कनीनिकाम्
२६. च. लग्नाम्

बाहुलतां[२७] हृषीकेशहृदयदेशा[२८]ध्यासनलग्नानुरागसारेणेव सरागं सत्कविफणितिमिव[२९] जनितशब्दाडम्बरमम्बरं जघनकान्तिकन्यकान्तपुरकनकमणिसालमिव काञ्चीकलापं जानुतलमूलकन्दोदञ्चितजङ्घानालधृतमङ्गुलीदलसङ्गतं कलहंसकरवमुखरितमरुणनलिनमिव चरणमपि दधाना साक्षादुपवनलक्ष्मीरिव निजाङ्गसंलक्ष्यमाणप्रवालकदलीकन्दली(लीम्) वेणुक्रमुकजपाकुसुमकुन्दमुकुलकोकिलालापचम्पककुसुमनलिनाली पङ्क्तिशाखासमवायलक्षणा कल्पलतेव सुमनः फलदायिनी चन्द्रिकेव सकलजननयनानन्दिनी सरस्वतीव निखिलकलानिलया भागीरथीव भुवनपावनपदक्रमा कलिन्दतनयेव कृष्णलीला[३०] कृतादरा कलहंसिकेव सन्मानसकमलनिवासिनी कर्णपूरकलिकैवालङ्कृतश्रुतिशिखरा करधृतकल्हारा मरतकशिलातिनीला कापि बाला समलक्ष्यत।

बालां मुनिः पद्ममुखीं सपश्यन्
बभूव तां प्रीतिसमाकुलात्मा।
पुरन्दराशामिव पूर्णचन्द्र-
स्संशोभितां वारिनिधिश्चलोर्मिः[३१]।।१२।।

सतामथ सतां पुरोगस्तामरसलोचनां तामररसवासिनीमिवापरां धरातलगतोद्गतनिधिमिवावलोक्य विगलितानन्दबाष्पजलो हर्षगद्गदया गिरा बभाषे।

का त्वं वत्से कमलनयने कन्यकालोकभूषा
को वा हेतुर्मदुपगमने कश्च ते जन्महेतुः।

२७. च. बाहुतलां (वर्णविपर्ययः)
२८. ख. 'देशा' इति पदं नास्ति
२९. ख.ग. फणितिबृन्दमिव
३०. ख. कृष्णलीलालंङ्कृता
३१. च. लोमाः

वाणी[३२] किं वा किमसि धरणी वारिजावासिनी किं
क्षोणीमेनां चरणरजसाऽलङ्करोषि त्वमेका।।१३।।

इत्थं वदन्तमभिवन्ध्य मुनीश्वरं तं
सा कन्यका सविनया समुवाच वाचं।
ज्योत्स्नाङ्कुरप्रतिभया परितोषयन्ती
स्निग्धावदातदशनप्रभया चकोरान्।।१४।।

जानीहि मां जनक भूभृतमाश्रयन्तीं
तां जानकीमिव महाध्वरभूमिजाताम्।
त्वां सर्वमुक्तिजनकं जनकं प्रपन्नां
तातस्त्वमेव जननी तुलसी ममासौ।।१५।।

इति कृतभाषणामपरिमितभूषणां तामीषणारहितोऽपि तत्पूर्वाधिगततनयेषणार्द्रचित्तो विष्णुचित्तस्त्रिभुवनमहाधाम्नो वटमहाधाम्नः पुरतो नीत्वा निजमान्तरमानन्दसिन्धुमाशृसलिलव्याजेन बहि[३३] परिवाहयन् निखिलवेदान्तवेद्याय तस्मै चेमं[३४] वृत्तान्तमावेदितवान्।

श्रीविष्णुचित्तस्य वचो निशम्य
श्रोत्राभिरामं फणिराजशायि।
अशेषवेदी स मुनीश्वरं तं
कृतस्मितः[३५] किञ्चिदिदं बभाषे।।१६।।

नाम्ना गोदा तव च तनया सेयमस्यास्तु माता[३६]
सैव श्लाघ्या भवति तुलसीसत्वमालीसमूहैः।

---

३२. ख.च. नीला
३३. च. बहिरिव
३४. च. इमम्
३५. च. कृतस्मितम्
३६. च. जाता

एनामेणीमिव वनभुवामाश्रमे पूर्वजातै-
रेणैर्बालां सह सुललितां लालयाहं पतिस्याम्[३७] ।।१७।।

भगवतेति समादिष्टोऽतिहृष्टस्त्रिदशसुन्दरीमवातिसुन्दरां(रीं) तामानीय निजमन्दिरं[३८] सहजतनयाभिस्सह संयोज्य द्विजाधिराजो मुनिः द्विजराज इव कलामृतरसैरपुष्य[३९]दनुवासरम्।

संवर्धमाना च[४०] दिने दिने सा
चकार गोदा जनलोचनानाम्।
आनन्दमत्यद्भुतरूपसम्प-
च्चकोरि[४१]काणामिव चन्द्रलेका।।१८।।

वीणेव श्रुतिमधुरभाषणा कनीनिकेव सकललोचनगता कमलेव मुरमथनहृदयवासिनी सा सह सखीजनेन गृहदेहलीषु धूलीविरचितगेहलीलया च परिणयवेषभूषितपाञ्चालिका मिथुनवैवाहिकोत्सवकेलीभिरपि लीलाशुकालापशिक्षया च[४२] करतलतालनर्तितलीला[४३]मयूर-नृत्तावलोकनेनापि पाणितलपिहितलोचनसखीसमुदीरितनामधेयविपर्यय-परिह(हा)सनेनापि स्फटिकामलवेदिकासु घुटिकाविनोदैरन्यैरपि शैशवोचितव्यापारैरनयदावादतप्रथमरसादिवसान्। कदाचन मृगलोचना सा कनकसौधतलसञ्चारिणी सालभञ्जिकेव सजीवनलिनलोलुपतयेव

३७. ग. पतिभ्याम्
३८. ग.घ. निजमन्दिरे
३९. ग. रसैरव , ख.घ. रसैरपुष
४०. ख.ग. च
४१. घ.च. चकोर
४२. च. अपि
४३. च. करतलतालनृत्तितलीलाग्रह
४४. च. कृत इति पदं नास्ति

चरणपरिसरकृत[४४]सञ्चरणेन घनपुलिनकौतुकेनेव जघनसविधसङ्गते-नाकाशशयेव मध्याभ्याश्चरेण सलिलसहचरशङ्कोत्कण्ठयेव कण्ठोपकण्ठवर्त्तिना विकचनीलोत्पलविचारेणेव लोचनान्तिकगतेन शिरोतिलङ्घना[४५] सहिष्णुतयेव चलवलयकरकिसलयताडननिर्वर्त्तितेन तदपराधभयेनेव पुनरपि चरणभुवमाश्रितेन पतितोत्पतितेन कन्तुकराजहंसेन कुन्दमुकुलदन्तरुचिरचितहारा विजहार।

बाला लतानामपि पादपानां
मूलालवालान्यपि तान्तमध्या।
आरामभूमौ मुहुरभ्यषिञ्च-
त्स्मेरानना जातु घटाम्भसा च ।।१९।।

कदाचन सञ्चरन्ती[४६] कनकलतेव पल्लविता कनकनूपररणित[४७]रमणीयचरणगतिजनितसजातिमतिभिः कलहंसिकाभिः सरससारसन[४८]कनककिङ्किणीरवरचितसारसपङ्क्तिमतिभिः सारसयुवतिभिरपि लोचनकृतचकोरमतिभिश्चकोरिकाभिरपि कुटिलालकविहितालिपङ्क्तिमतिभिरलिनीभिरपि लीलालापकृत-कोकिलालापमतिभिः कोकिलैरपि[४९] केशकलापाहितकलापि मतिभिः कलापि नीभिरपि पदे पदे समुपाधिता[५०] पाणितालप्रभया पल्लवरुचिमाम्रेडयन्ती सहजसौरभलोभागतषट्पदकुलाकुलालिका पुष्पापचयेन पितुराक्रीडे चिक्रीड।

---

४५. च. शिरः लङ्घना

४६. ख.ग.घ.च सा चरन्ती

४७. ग. मणित, च. रमणित

४८. ग. सरसरशन

४९. ग.घ. च. कोकिलाभिरपि

५०. ख.ग.घ.च. समुपासिता

क्रीडारसैरिति सहैव सखीजनेन
गोदा तु शैशवसुखान्यनुभूय भूयः।
चान्द्रीकलामिव कलासरसां द्वितीयां
तारुण्ययोगललितां च दशामवाप।।२०।।

अङ्गेषु तां शैशवशोभमाना-
मलञ्चकाराद्भुतयौवनश्रीः।
प्रवालरम्यामिव बालवल्लीं
प्रसूनसम्पन्ननयनाभिरामा(रामाम्)।।२१।।

तस्यास्तनद्वितयमङ्कुरितं कृशाङ्ग्याः
वल्ली[५१]प्रसूनमुकुलप्रथमोपमेयम्।
वल्मीकवक्त्रदरनिर्गतकार्द्रवेय[५२]-
शीर्षेण[५३] साम्यमुदवाप सुलोचनायाः।।२२।।

मध्यं तस्यास्त्रिपुरमथनक्षौमसाम्य[५४]ञ्चकाङ्क्षे
व्यक्ताव्यक्ता सरणिरसिता रोमराजेर्बभूव।
नेत्रद्वन्द्वं चपलचपलं लङ्घितुं श्रोत्र[५५]सीमां
भ्रूवल्ली च प्रकृतिकुटिलं[५६] भावमादातुमैच्छत्।।२३।।

शनैश्शनैरनङ्गमातङ्गविहरणक्षमाङ्गसौन्दर्यामृतसर[५७]-

५१. ग.घ.च. मल्ली
५२. ग. प्रद्युम्नबालवनजातमहार्घपूग
५३. ग. युग्मेन
५४. ख. सौम्य
५५. च. नेत्र
५६. ग.घ. च. कुटिली
५७. ख. रस (वर्णविपर्ययः)

स्समुदितसरोजमुकुल[५८]सदृशमुरोजयुगलमपजिततालयुगलमराल-केश्या[५९]स्समदृश्यत।

सञ्छादिते चेतसि सानुरागे
सान्द्रेण लज्जावरणेन पूर्वम्।
ततो दुकुलावरणञ्चकाङ्क्षे
तस्याश्च वक्षस्तनवृत्त[६०]शोभि।।२४।।

तदनु गभीरनाभीविवरादभिनवकुचयुगलामृतकलशाभिलाषोन्मुख-निरर्गलविनिर्गतपिपीलिकाराजिरिव रोमराजिरराजत[६१] नीरजाक्ष्याः उपचिते सति तस्याः कुचयुगले तदभूतपूर्वाभिवृध्यसहतयेव मध्यमपि सनाभि बभार[६२] परिमाणं तनिमानम्।

तस्यास्तनद्वितयभारमिमं कृशाङ्ग्या
मध्यं न सोडुमिदमर्हति मुष्टिमेयम्।
अत्याहितं भवति सम्प्रति हन्त हन्त
वक्तुं किलेति नयनं श्रवणान्तमाप।।२५।।

चरणारुणनलिनसञ्चारिकलहंसकनादजनितनादपदवीरसायनं परिणतोरुयुगलीकदलिकास्तम्भसम्भावितं मध्यगतनाभीलीलासरो रोमराजिलताभिराममतिललितत्रिवली(ली)सोपानपङ्क्तिसहितनिरन्तरचन्दनशिशिर-

---

५८. ग. सरोजयुगलमुकुल
५९. ख. युगलमपि जिततालयुगलमरालकेश्या
ग. युगलमपजिततालमराल केश्या
घ. युगलमपि जिततालमरालकेश्या
६०. ग.च. युग्म
६१. ग. राजत
६२. ख. भार, च. बभार सनाभि

पयोधरक्रीडामहीधरमनुकलसमुदितसुधारसमयालापपञ्चमालापमलक[६३]-मधुकरावलिविलसितं तदशोभत रतिपतेरुपवनमिव यौवनं गोदायाः।

स्तनकुम्भभरावनं[६४] म्रमीष-
त्तनुरोमावलिशोभितं तदङ्गम्।
धनुषा सगुणेन पुष्पकेतो[६५]-
र्धृतघण्टाद्वितयेन तुल्यमासीत्।।२६।।

अमृतकिरणोदय इव कुमुदिनीं मधुमास इवोपवनलक्ष्मीं मलयानिल इव केतकीं माधुर्यातिशय इवेक्षुलतां[६६] शरदागम इव चन्द्रिकामभिनव-जलप्रवाह इवापगां रसबन्ध इव सत्कविभारतीं सौरभयोग इव कनकारविन्दिनीं विनय इव विमल[६७]विद्यामलङ्चकार तामेवातिशयितशृङ्गाररागभवनं यौवनम्।

तद्यौवनं केवलमङ्गनाया[६८]
न भूषयामास शरीरमात्रम्[६९]।
तया धृतान्यप्यनुवेलमङ्गे
माणिक्यमुक्तामयभूषणानि।।२७।।

मुहुराहितसखीजनहृदयप्रमोदा[७०] मलयपवनावधूतप्रसवसौरभ-भरितेषु मृदुलशीतलसिकतेषु लतामण्टपेषु च शरदमलचन्द्रातपावदात-

६३. ख. मालापमन्तुके
६४. घ. विरावनं
६५. ग.घ.च. मीनकेती
६६. च. इवेक्षुदण्डलता
६७. च. अमल
६८. ख. केवलमङ्गनायाम्
६९. ग.घ.च. शरीरवल्लीम्
७०. ग.घ. प्रमोदा सा, च. प्रमदा गोदा सा

स्फटिकमणिसौधस्थलीलीलासु च शिशिरहिमसलिलरचितचन्दनालेषेषु च[७१] कलकोकिलालापेषु च[७२] श्रुतिमधुरवल्लकीसल्लापेषु च विहरदलिमालिकायामपि लोचनहृदयरञ्जनेषु चाञ्जनेषु श्रवणसुभगेषु परिणयकथाश्रवणेषु च[७३] बभूवातिकुतूहलिनी।

पाणिग्रहाय गुरुबन्धुभिरर्थितापि
सा सुन्दरी तु चकमे हरिमेव कान्तम्।
अम्भोधिराजमपहाय नदान्तरं किं
मन्येत जह्नुतनयामहितानुभावा।।२८।।

सेयमनुदिनमङ्गालङ्कारलोलुपा निजजनकबद्धमालया तदसन्निधाने भूषितकेशकलापाभवनकुपाभ्यन्तरसमवेक्षितरमणीय-वेषरचना पुनरपि तां पुष्पपेटके[७४] निक्षिप्य गुरुशुश्रूषा निरतासीत्। तामेव मालिकामनुदिनमिमं[७५] व्यापारमविदन्नेव समर्पयामास सर्पाधिशायिने[७६] भगवते विष्णुचित्तोऽपि।

दृष्ट्वा कदाचिदथ दामनि विष्णुचित्तः
केशं निरस्य च तदन्यदुपाजहार।
नाथाय सोऽपि मुनिवर्यमुवाच गोदा
केशोपभुक्तकुसुमेषु कृतानुरागः।।२९।।

---

७१. ख.घ.च. 'च' इति वर्णः नास्ति
७२. च. 'च' इति वर्णः नास्ति
७३. ख.घ. 'च' इति वर्णः नास्ति
७४. क. पुष्पपेटिकायां
७५. च. ममुम्
७६. ग. सर्पातिशायने, घ. सर्पातिशायिने

श्रीविष्णुचित्तदुहितुस्तव केशपाश-
सौरभ्यगर्भमनुवासरमर्पितं मे।
दाम त्वया तदिदमद्य तु तेन शून्यं
गन्धेन दाम पुनरेव तदा नयेति।।३०।।

मुनिरपीति भगवतो वचनमाकर्ण्य कर्णरसायनमतिविस्मितः कदाचित् क्वचन तिरोहितः पुनरेव मालाभूषितकुन्तलायाः कृतनयनानन्दकन्दलायाः दुहितुस्तत्कृत्यमदृष्टपूर्वं दृष्ट्वातिहृष्ट-मना[७७]स्तदनुरूपवरचिन्तया विरराम।।

नासादिता मधुकृतेव लता सपुष्पा
चान्द्रीकलेव विधृता शिरसा[७८] न शम्भोः।
स्वस्थानयोगमनवाप्तवतीव भूषा
गोदा तु[७९] सा परिणयेन बभूव शोच्या।।३१।।

दीना निनाय दिवसानपि सा कथञ्चि-
त्पर्युत्सुका परिणये द्विजकन्यकानाम्।
प्राप्तुं मुकुन्दमविदन्त्युचितानुपाया-
न्वक्तुं ह्रिया न चतुरा पितुरात्मवाञ्छाम्।।३२।।

इति गोदापरिणये चम्पूकाव्ये द्वितायस्तबकः समाप्तः।।

श्रीमत्यै गोदायै नमः।

---

७७. च. प्रहृष्ट

७८. क. शिरसा विधृता (पदविपर्ययः)

७९. घ.च. अथ

तृतीयः स्तबकः

ततो मृगाक्षीमतिभूषिताङ्गीं
तारुण्ययोगेन नवेन[१] तन्वीम्।
वसन्तलक्ष्मीरपि तां प्रसूनै-
र्नवैरलङ्कर्तुमिवाजगाम।।१।।

अथ तां वयस्यामिव पुष्पाभरणं वहन्तीमायान्तीं[२] वसन्तलक्ष्मीं निवेदयन्त्य[३] इव गोदायास्सरसचूताङ्कुरास्वादजनित-कण्ठरागकृतजनोत्कण्ठाः परभृतयुवतयः पञ्चमालापमुदञ्चयामासुः। विरहातुरजनहृदयविदारणलग्नशोणितारुणवसन्तनखराणीव विरेजुरतिपेशलानि पलाशपुष्पाणि। ऋतुराजस्य पुरतश्चन्दनाचलमन्द-मारुतान्दोलिता चलितकुसुमकोरकस्तनकिशोरकललिता कुरवकलता चञ्चलचञ्चरीकालिरुचिरालकासलय[४]किसलयकरा सलीलं ननर्तेव।

चाम्पेयशाखा वनितास्समन्ता-
च्चारुप्रवालाग्रकरस्थिताभिः।
निजप्रसूनोज्वलदीपिकाभिः
नीराजयन्तिस्म वसन्तराजम्।।२।।

मदविवशमदिराक्षी[५]वदनमदिरागण्डूषशेषरसोऽपि केसरतरूणामकरोत्सुमनोविकारं किं पुनरसामधरसुधारसकौतुकानां कामुकानाम्। मदनसचिवेन मधुसमयेनानुनीयमाना मानिनी जनमानस-

१.च. नवीन

२. ख. वहन्तीं

३. क. आवेदयन्त्य

४. ग.घ. रुचिरालकालय

५. ख.ग. क्षि, घ. क्षिं

मदगजनिबन्धनाय लोहशृङ्खलेव विशृङ्खला मधुमदमुखरा मधुकरावलिर्विरराज।

सिन्धुवारकुसुमैः कृतहारा
कर्णिकारकलिका श्रुतिपूरा।
चम्पकप्रसवरेणुपटासी-
त्सर्वलोचनसुखो[६]पवनश्रीः।।३।।

अरुणनलिनोदरेष्वलिनो निलीनाः नीलाकृतयो विलसन्तिस्म मदनशरानलदह्यमानानि मानिनीजनमानसानीव मूर्तिमन्ति मलिनानि।

मन्दानिलो विकचकोमलमाधवीना-
मान्दोलयन्ननुकलङ्कलिका नवीनाः।
माकन्दपूगकुहली मकरन्दवाही-
म्मानं बिभेद सदृशां[७] मदनैकबन्धुः।।४।।

विरहदलितपथिकजनहृदयविवरसमुदितमदनपावकशिखाभि-रिव पाटलकुसुमपटलीभिः पाटलान्यभवन्नरण्यानि।

कं केलिभिः कल्पितभृङ्गकेलि-
रुद्यानपालीधृतपुष्पधूलिः।
प्रवालपङ्क्त्या ललिता मुनीनां
विलोप[८]यामास मनोऽपि धीरम्।।५।।

अनङ्गपटवासविकीर्णघनसाररेणुसदृशकुसुमधूलीधूसरितानि कुसुमितलता वधूविकीर्यमाणमधुभिक्षापूरितमधुकरभिक्षुमनोरथानि

---

६. च. शुभे
७. च. सुदृशां
८. ग.घ.च. विलोभ

वासन्तिकोत्सवप्रवृत्तसीमन्तिनी करकिसलयावकीर्यमाण-पुष्पाञ्जलिसमभ्यर्चितपुष्पायुधानि मदविवशवेशवीलासिनी वदनमधुसौरभमेधुरमृदुसमीरणानि सहकारकोरकरसास्वादनहृष्ट-परपुष्टमुखोदञ्चितपञ्चमालापरञ्जितजनहृदयानि बभूवुरतिरमणीयानि[९] तरुणीकपोलमूलोपलिप्यमानमृगमदबहल[१०]परिमलाघ्राणविगलितमानिनी-जनमानानि मधुदिनानि।

प्रादुर्बभूव प्रमदाजनानां
बध्नन् कुचाग्रे श्रमवारिलेशान्।
निस्सूत्रमुक्ताफलदामकल्पा-
न्निदाघकालः कृतकामलीलः।।६।।

अलकमूलकृताभिनवचन्दनालेपनाः स्तनयुगलविनिहितशीतलहारा धारा गृहगता नवकदलीदलकोमलवसनधारिण्यस्तरुण्य[११]स्तरुणाशोक-पल्लवाङ्गुलि[१२]हतवल्लकी मधुरतर[१३]निक्वाणश्रवणसुखदरनिमीलितैः मणिमयजाल[१४]कमार्गनिर्गतैरसितोत्पलदलसदृक्षैः कटाक्षैरवशालोकित-तरुणातपाः कुमुदिन्य इवाधिकमङ्ग्लानिमभजन्त।

विकचपाटलसौरभमेदुरो
भृतमहेभमदाम्बुकणो मरुत्।
अपि[१५] विधूतकदम्बकदम्बको
जनयति स्म मुदं जगतां मुहुः।।७।।

---

९. च. बभूवुः रमणीयीनि
१०. ख. बहुल
११. ख स्तारुण्य
१२. क. ली
१३. ख. मधुरमधुरतर, ग. मधुतर
१४. क.ख. मणिजाल
१५. ग.च. दर

बहलोष्मग्रीष्मपरितापविवशेव निशा परमभजतकृशिमानम्। सुरभि[१६]सम्पादितमम्भोरुहचषकगतमभिनवमधुमधुपर्कमापीय मधुपातिथिः प्रमदविवशो मदगुरुनिनदैस्तमभिननन्देव। मदनवागुरिकेण मदमञ्जुलमौर्वीमधुकर[१७]गानविमोहितजनहृदयेन पथिकहरिणप्राणापहरणाय प्रज्वलितेव दवज्वलनपटलीपाटलाऽशोभत किंशुकवनावली(लीः)। विकसितारुणनलिनासु सुललितचरणाः विपुलपुलिनासु विशालजघनाः निम्नावर्तासु नतनाभयो निरन्तरनिलीनकोकमिथुनासु निबिडकुचकलशाः धवलमृणालासु विमलहाराः चपलवीचिकासु चञ्चलबाहुलताः कमलमनोहरासु कोमलहासाः[१८] विलोलमीनासु व्यालोलनयनाः घनजलनीलिकासु कान्तकबरीभर[१९]रमणीया आत्मानुरूपासु तरङ्गिणीषु वराङ्गनाः कामुककरधृतकाञ्चनश्रृङ्ग[२०]विमुक्तसलिलधारासेचनगलित-कुचकुङ्कुमाः मदवारणकरशीकरक्षालितघनकुम्भगैरिकरेणवः करणव[२१] इव[२२] दर्शनीयाः सजलानुषक्तकौसुम्भान्तरीयकान्तर्दृश्यमानकनकशिला-सदृश[२३]कान्तिसुभगोरुतला विगलितकेशकुसुममपमृष्टतमालपत्रमपोहित-कालाञ्जनमाहितनयनरागमपवाहिता[२४]धरयावकमवलुप्ताङ्गरागमालोलहा-रलतामुच्चलितकुचकलशमुद्भिन्नरोमाञ्चमभ्युदितावयवकम्पमनुमतालिङ्गन-मवमतमन्दाक्षमाचलितनितम्बबिम्बमारब्धचाटुवचनमाविर्भवदङ्ग-सादमम्बुविहारं सुरतविहारमिवाचेरुरवसाने दिवसानाम्।

१६. ग.घ.च. निदाघ
१७. च. मधुकरमौर्वी (पदविपर्ययः)
१८. ख.ग.घ.च. कोमलास्याः
१९. ग. भार
२०. च. भृङ्ग
२१. घ. करेणु
२२. ग. भुवं
२३. च. शीलारम्भास्तम्भसदृश
२४. च. रागमपवाहिता

धरातलस्फोटपथैरजस्रं
रसातलं भानुकराः प्रविष्टाः।
फणीश्वराणां फणरत्नदीपै-
रवारितान्यप्यहरन् तमांसि।।८।।

अम्भोजवासविमुखैरलिभिर्बभूवे
शैवालमूलशरणैश्शफरैश्च लोलैः।
पुन्नागकोटरकुटी पुलिनं विहाय
तप्तैरभाजि तपनेन तु चक्रवाकैः।।९।।

अथ क्षितेरर्ककराभिताप-
मह्नाय हर्तुञ्जलशीकरौघैः।
आश्वासयञ्चन्द्रि(न्द्र)किणां वचोभि-
रम्भोदकालस्समुपाजगाम।।१०।।

अथ जगदाक्रमणोद्यतजलनिधिवेलेव सलिलराशिसमुदञ्चितसपक्ष-शैलसङ्घात[२५] इव वर्षा वधूकबरधूपपटलीव तटिदङ्गना नटनमणिसौध-पङ्क्तिरिव सौदामिनी कनककक्ष्याभिरामा मन्मथमहाराजस्य मदवारणघटेव भयतरलितकादम्बकदम्बा कादम्बिनी जिजृम्भे।

जलदकल्पकहेमलता वियु-
ज्जलनिधेरिव बाडबहेतयः।
स्मरमहीपकृपाणलता मुहु-
स्समचलन्नचिरद्युतयो[२६] दिवि।।११।।

---

२५. ख. संवात
२६. च. द्वितयो

सौदामिनी वनितया सहसानुरागा-
दम्भोदभर्तुरबलाजनरञ्जनस्य।
कण्ठार्पितेव कमलोत्पल पत्रमाला
वृत्रारिचापलतिका विरराज चित्रा।।१२।।

सम्फुल्लकन्दलवनोदितसौरभेण
संसर्पता सुरभयन् ककुभां मुखानि।
आपातयन् प्रविरलान् प्रथमोदबिन्दू-
नाधूतनीपविटपीपवनश्चचार।।१३।।

अवापुरानीलपयोदबृन्दा-
दाराच्चरन्त्यो विशदा बलाकाः।
पतङ्गकन्यासलिलोपसर्प-
द्भागीरथी पाण्डरफेनशोभाम्(भाः)।।१४।।

पयोदमणिमण्टपे समयसूत्रधाराज्ञया
प्रणर्तिततटिन्नटि(टी)त्रुटितहारमुक्तानिभैः।
अपाति जलबिन्दुभिश्चलिततत्पदालक्तक-
प्रकीर्णप्रषि(ष)तश्रियं भुवि सुरेन्द्रकोपादधुः।।१५।।

मन्थानशैलमथिताम्बुधि धीरनादै-
रम्भोधरेषु मुखरीकृतदिङ्मुखेषु।
मानं विधूय मदनास्त्र[२७]हतामृगाक्ष्यो
भीता इवाशुरमणान् परिरेभिरे च[२८]।।१६।।

---

२७. ग.घ. मदनासृ
२८. ग.घ. रेऽथ

महीभृतां मूर्ध्नि महाम्बुवाहो[२९]
मुञ्चन् बभासे[३०] मुहुरम्बुधाराः।
मुरद्विषो मूर्ध्नि विमुक्तवारि-
धारेव माणिक्यसहस्रधारा।।१७।।

सलिलेन सहैव वारिराशे-
र्घनपीता जठरे न[३१] जीर्यमाणाः।
अथवान्तिवशादबहिर्विमुक्ता
इव मुक्ता करका निपेतुरभ्रात्।।१८।।

महीधराणां कटकाद्विनिर्गता
महापगा रत्नसुवर्णभूषिताः।
समुद्रराजं प्रतिसम्प्रति[३२] स्थिरे
पितुर्गृहाद्भर्तुरिवाङ्कमङ्गनाः[३३]।।१९।।

कतिपयजलबिन्दुमात्रयाचकानां चातकानां मनोरथमभिपूरयितुं प्रवृत्तेन सकलजनानामपि जीवनं दिशतां[३४] भगवता[३५] न पूरिता[३६]स्तटाकाः को(केकाः) न सिन्धवः परिपूरिता इति किल को वचोभिः कलापि नो वन्दिन इव ननन्दुरम्बुधरम्।

---

२९. ग.घ. महाब्दपङ्क्तिः
३०. ग.घ. बभौ दिशन्ती
३१. घ. 'न' इत्यक्षरं नास्ति
३२. क.च. त
३३. ग.घ.च. पितुर्गृहात्कान्तमिवोत्तमाङ्गनाः
३४. ख. दिशिता, ग. दशता, घ.च. दिशता
३५. ख.ग.घ.च. भवता
३६. च. परिपूरिता

#अपि मित्रमसौ जगत्रयाणा-
मभि[३७]भूतः परिणाममम्बु[३८]वाहैः।
नलिनीमिति वारिसन्निमग्नां
कथयद्भिः किल दर्दुरैश्च नेदे[३९]॥२०॥

अभिनवचन्द्रकलाधवलं श्यामलबाह्यदलावृतं केतकदलं विरहिजनहृदयदलनाय शम्बरारिसम्पादितो हरिनीलमणिकोशगतश्शाणशातः कराल इव करवालोरुरुचे। जलदमलिने सति गगने हृदयमपि विरहिणीनां मलिनमभूत्। सकम्पायां चम्पायामकम्पन्त(न्न) पतिरहिताः जलमुचि सति घने नयनयुगलमपि मुमोच तासामपरिमितसलिलम्।

निदाघ कालप्रभवं समग्रं
निरस्यमानं सलिलैर्नदीनाम्।
विसृज्य भूमिं सकलामिवोष्णं[४०]
वियोगिनीनां हृदयं विवेश॥२१॥

एवमादिवराहमहिषीं विश्वम्भरामम्बुधरमणिकुम्भकदम्बकैरभिषिच्य गतायां[४१] वर्षायोषायामतिस्वच्छमम्बरं[४२] तारावलीहारानिन्दुबिम्बविमलादर्शमपि दर्शयन्ती शरत्सखी समाजगाम।

वियदशोभत निर्मलमञ्जसा
मलिनवारिदमण्डलवर्जितम्।
मदनवर्जितमानविवर्जितं
मधुजिदाश्रयिणामिव मानसम्॥२२॥

- श्लोकोऽयं च मातृकायां नास्ति ।

३७. ग. अपि

३८. ग.घ. परिणीर्ममाम्बु

३९. ग.घ. दर्दुरैस्सुनेदे

४०. च. वौष्ण्यं

४१. ख. गतायाः

४२. ग.घ. स्वच्छमम्बराबरं

विपाण्डरं मुक्तजलं वलाहकं
विवाह सद्यो विगता[४३] तटिल्लता।
अपेत सर्वस्वमतिक्षयातुरं
निरस्य कान्तं गणिकेव निर्धृणाः(णा)।।२३।।

कालभैरवतटित्कृपाणिका
खण्डिताब्दकरिकुम्भसम्भवैः।
मौक्तिकैरिव नभो निरन्तरं
तारकैश्शरदतिस्फुटैरभूत्।।२४।।

परिफुल्लपाण्डुतरकैरवं सरः
प्रतिबिम्बितेन शशिना विभूषितम्।
तरुणेन्दुतारगणकोरकोज्वलां
गगनस्थलीमनुचकार निर्मलाम्।।२५।।

शनैश्शनैश्शैवालकेशानपि सैकतजघनानि दर्शयन्त्यो वेशविलासिन्य इव शैवलिन्यस्सुललितगामिन्यः मधुरवादिन्य इव मन्द[४४]मदकलविहगकूजितेन मुहुर्मुहुर्मुदुलपवनावधूतनलिनीदलोत्तरीयान्तरसंवृतविवृत[४५]कोकमिथुनकुचभराश्चपलशफरलोचनाविरचितवीचिभ्रूविकारा मानसानि जनानामजह्रुः(ह्लुः)।

अधिकपरुषमेघनादभीता
धवलतनूरुहतापसाः प्रयाताः।
शरदृतुरघुवीरसत्सहायाः
पुनरपि पुण्यवनानि भेजिरे ते।।२६।।

तेजसामतिशयात् ओषधीशेन काननान्तरेषु निक्षिप्ता इव चन्द्रिका[४६] प्रवाहाश्च काशिरे विकसितकाशाः।

४३. ख. वधिता
४४. घ. अमन्द
४५. ख. संव्रतविप्रति, ग. संप्रत, घ. संप्रतविवृत
४६. ग. चक्रिका

अरुणचञ्चुगृहीतपिशङ्गरु-
क्लममञ्जरिपिञ्जरिता क्वचित्।
मरतकद्युतिरिन्द्रधनुश्श्रियं
दिवि चकार शुकावलिरुद्गता।।२७।।

जीमूतपटलसञ्छादितदिशान्तेषु वर्षा दिवसान्तेषु[४७] विरहिणी वपुषि निरन्तरमिषुवर्षमभिवर्षतो मीनकेतनस्य चापगुणतां गतानामली[४८]नामतिविश्रमाय सलिलमध्ये शरदृतुशिल्पिना कल्पिताच्छस्फटिकमण्टपा[४९] इव पुण्डरीकाणि मधुरसायनवन्ति विजितवनितावदनशोभातिशयानि शुशुभिरे।

प्रालेयवर्षप्रभवेन्दुबिम्ब-
मम्भोरुहाणां हसतामभिख्याम्।
असूयया हर्तुमिवाजगाम
दुर्दान्तकामोध[५०] तुषारकालः।।२८।।

अथ कर्पूरपटवा सधूलिरिव गगनलक्ष्म्याः करशीकरालिरिव सुरवरवारणस्य[५१] निजनाथकरणामप्रकाशेन[५२] निर्गलिता बाष्पबिन्दुपटलीव निशायाः दिक्कन्याविकीर्यमाणलाजाञ्जलीपुञ्ज इव भुवनविजयोद्यत[५३]मदन-महाराजस्य निश्शेषपरित्यक्तभवानि गुरुरिव हिमानि समजृम्भत।

निस्पृहत्वमभजन्त सन्ततं
निह्नुते महति तेजसां त्रये[५४]।

---

४७. ग. 'वर्षा दिवसान्तेषु' इति पदं नास्ति
४८. ख.ग. लि
४९. च. मण्टपान्
५०. च. दुर्दान्तकामश्च
५१. ग. 'गगनलक्ष्म्याः करशीकरालिरिव सुरवरवारणस्य' इति पदं नास्ति
५२. च. प्रकाशे
५३. च. दृत
५४. ख. नृधे, ग.घ. तेजसो द्वये

सौधवासहिमवारि चन्द्रिका
हारचन्दनरसेषु योषितः।।२९।।

कस्तूरिका सौरभमेदुरेषु
कान्ताकटोरस्तनमण्डलेषु।
सोष्णेषु सुप्तास्सततं युवानो
न वासरं वा विविदुर्निशां वा।।३०।।

आमूलमम्भास्यति शीतलानि
कुर्वन् तुषारः पथिकाङ्गनानाम्।
नालं विधातुं नयनाम्बुशीत-
मासीदनङ्गेषु भिरातुराणाम्।।३१।।

अतिशिशिरतुषारमारुतातिवेपितां सहचरीमुपगृह्यत नूरुहेण तरुविटपनीडग्रहगा विहगा[५५] निशितत्रो(क्रोट)टिकोटिकण्डूयनेन प्रीणयन्तः पथिकजनाङ्गनानामनङ्गनालीकनिपातजनितां कामपि दुरन्तां चिन्तां चेतसि समजनयन्।

इत्थमुत्सवमृदूपकल्पित
दुस्सहं[५६] विरहदीनचेतसाम्।
कौतुकेन समवेक्ष्य गोदया
कान्तसङ्गमसुखे कृतं मनः।।३२।।

इति गोदापरिणये चम्पूकाव्ये तृतीयस्तबकः। श्री गोदायै नमः।

---

५५. ग. 'विहगा' इति पदं नास्ति
५६. ख. दुर्भुहं

चतुर्थः स्तबकः

अथानुरूपं निजरूपसम्पदा-
मवेक्ष्य गोदा वसुदेवनन्दनम्।
तमेव भर्तारमवाप्तुमाददे
व्रतं तु गोपीभिरनुष्ठितं पुरा।।१।।

त्यक्ताञ्जनाभरणचन्दनलेपमाला
भुक्त्वा हविष्यमनुवासरमेव गोदा।
क्षोणीशयाक्षुधितभिक्षुकभैक्षदा च[१]
साक्षाद्बभूव भुवि मूर्तिमतीव शान्तिः।।२।।

अनुदिनमुषसि शनैश्शनैस्त्रिदशयुवतिजनपीत[२]कापि शायिने[३] निजाङ्गनिलीननीलिमैकनीलोत्पले करतलगलित इव रजतचषके शशिनि चरमगिरिशिखरे निपतति गगनशय्यागतनिशाकरेण सह विहारी विभावरी[४] विशीर्णहारमणितारेति रोहिते तारागणे कामिनीजनकठिनतरकुचतट-परिरब्धकामुककरतलानु[५]भूयमानसुरतसुखाक्षमया[६] प्रचलितपक्षद्वयेन जगच्चक्षुषमाकारयतीव कटुरटति कृतकर्ण[७]पीडे ताम्रचूडे विगलितबन्ध-कुन्तलवान्तकुसुमानुरञ्जितपदवीषु रोमावली लतामूल[८]लक्ष्यमाणाङ्गरागासु सुमनोहराङ्गलतिकासु सङ्केतनिर्गतास्वभिसारिकासु सम्प्रबुद्ध-

---

१. च. सा
२. ख. जननी पिता, ग.घ. जननीपित, च. जननिवीत
३. शायने
४. ख. विभावरीव
५. ख.घ. परिरब्धकामुकजनानु, ग. परिरम्भणासत्तकामुकजनानु,
च. परिरम्भणासक्तकामुकजनाननु
६. च. क्षमतया
७. कृतकण्ठ
८. च. लतामूले

विहग[९]कुलचिलचिल[१०]रवमुखरितेषु दिशा[११]मुखेषून्निद्रराजहंसपक्षानिलावधूतदरविकसितमुखदीर्घिका पुण्डरीकोदरमधुपरागहारिणी नलिनी निश्वसित इव निस्सरति न भस्वति विगतवियोगशोकेषु कोकेषु दिनकरकोपारुणकेसरी हन्यमानतिमिरकरिघटारुधिरधारयेवारुणरुचानमुचिरिपुदिशिकपिशितायां गिरिगुहान्धकारगतेषु दिवान्धेषु करधृतकमण्डु(ण्ड)लुषु दण्डाग्रधृतवल्कलेषु पुष्करिणीतटगतेषु तापसेषु स्वयं प्रबुद्धा स्वसखीरपि[१२] प्रतिभवनं गता सैवं प्रबोधयामास वधूः।

सखि[१३] जहिहि सुनिद्रां साम्प्रतं सुप्रभातं
श्रुतिपरुषनिनादः श्रूयते च द्विजानाम्।
हसति किल शयानां हन्त हन्ताधुनापि
त्रिदशपति दिशा त्वां दर्शिता पाण्डुतासौ।।३।।

मुररिपुभवनोद्यद्बोधशङ्खप्रणादो
मुखरितहरिदन्तो जृम्भते मद्वयस्ये।
हरिचरणसरोजध्यायिनामुत्थितानां
हरि हरिरिति घोषः[१४] श्रूयते च[१५] द्विजानाम्।।४।।

दरविकसितलीला दीर्घिका पुण्डरीक-
प्रभवपरिमलेन प्रीणयन् भृङ्गपङ्क्तिः।
सुदति कबर(रि)गन्धं सोऽयमिच्छन् भवत्या-
श्चरति च पवमानो जागृहि त्वं वयस्ये।।५।।

---

९. ख.घ. विहङ्ग
१०. च. कुलचिलिचिलि
११. ख. दिशामुखा
१२. च. स्वसखीभिरपि
१३. ख. सह
१४. च. हरिरिति बहुघोषः
१५. च. हि

सखि तव कथयन्ती स्वैरमाधूतपक्षा
रजनिविरति मे ते राजहंसाः प्रबुद्धाः।
मधुरतरनिनादैर्माधवीमण्टपस्थाः
कुवलयनयने ते कोकिलानाञ्च पङ्क्तिः।।६।।

सखि न विशति किं ते साम्प्रतं कर्णमार्गं
कुचभरनमितानां गोपिकानां विजृम्भन्।
करवलयनिनादः किञ्च काञ्चीनिनादो
मथितदधिनिनादो मञ्जुगीतस्य नादः।।७।।

अद्यापि शेषे[१६] किमहं प्रबुद्धा
वक्तुं समर्थाऽसि वयं न यूयम्।
सख्ये(ख्यो) हि सर्वास्समुपागताः किं
त्वद्वारभाजो गणय त्वमेव।।८।।

सख्यश्च सर्वाः प्रतिपालयन्ति
स्नानाय सङ्केतमहीमुपेत्य।
त्वामेव सुप्तां त्वदुदारवाचः
पुर[१७]प्रबोधे तु परी हसन्त्यः।।९।।

इति प्रबोधिताभिरन्योन्यबद्धपाणिभिः सङ्कीर्तितार्तिहरकृष्णकीर्तिभिरालीभिरन्विता सा कालनेमिवधकालनिलीनासृङ्मांससुदर्शनसंक्षालनाय[१८] भगवताहूतभागीरथीयमुनासरस्वतीसङ्गमनिहितमङ्गलं कमलकल्हारकुमुदकोकनदनीलोत्पलनिलीनषट्पदनादविहितनादपदवीरसायनं सारसचक्रवाकचक्रहंसकलहंसकारण्डवबकबलाका क्रौञ्चमिथुनरञ्जितम्। कोकिलकुलाद्युषितकन्दरहरिचन्दनमन्दारपूगपनसपुन्नागचम्पककेत-

१६. च. अद्याविशेषे
१७. च. पुनः
१८. क. क्षालनाय

कतक्कोलकुटजतिलक[१९]चूतवानीरनिरन्तरतटभुवम। तटाकमभिगम्य तदीयतरङ्गलहरी समुच्चलच्छिशिरशीकरमिलित[२०]प्रालेयानिलजनितदन्त-वीणादर्शितदन्तमुकुलरुचिरुचिरशोणाधरा कलशजलनिधिपयसि फणिपतिशयनं परमपुरुषं तं चिन्तयन्ती हिमसलिलादप्यतिशिशिरे तज्जले ममज्ज परिणति(त) सुखाशया तरुणी। उत्तीर्य सितदुकुलधारिणी कुचयुगलविनिहितमङ्गलहारलता स्यन्दमानसलिलबिन्दुमग्रेदरग्रथितमपि कबरभरमुद्वहन्ती प्रतिपदीन्दुकलासदृशविमल[२१]पुण्ड्रमण्डित-ललितललाटस्थली मृदुलसिकताकृतमुरमथनप्रतिमाचरणविरचित-पुष्पाञ्जलिरिममेव जजाप मन्त्रं चन्द्रमुखी

पस्पर्श यस्य चरणौ करपल्लवेन
पद्मालया भगवती बहुभिस्तपोभिः।
गोपी मनोनयनरञ्जनगोपवेशः
पाणिग्रहं स विदधातु पतिर्ममेति।।१०।।

सुललितगतिभेदाद्राजहंसीषु शिष्या-
स्विव नयनविलासान्निक्षिपन्ती मृगीषु।
परभृतवनितासु स्वोक्तिचातुर्यमन्त-
र्नियमितनिजचित्ता सैव मासीद्व्रतस्था।।११।।

निषेदुषी सत्कुशविष्टरेऽह्नि
निशासु च स्थण्डिलशायिनी सा।
कृष्णं नमन्ती मुमुदेस्तुवन्ती
त्यक्तान्यकार्या च[२२] तपश्चरन्ती।।१२।।

---

१९. क.ख.ग.घ. तक्कोलकुटजतिलक इति पदं नास्ति

२०. च. निमीलित

२१. च. विमिल इति पदं नास्ति

२२. ग.घ. अथ

व्रतोपवासैर्विषमेषुणाऽपि
खिन्ना नितान्तं च कृशा[२३] बभूव।
अर्कांशुतापैरपि[२४] वारणेन
संक्षोभ्यमाणा सरसीव तन्वी।।१३।।

इति विरचित[२५]व्रतोपवासजनितखेदायाः[२६] गोदायाः[२७] न साक्षात् बभूव भगवानरविन्दाक्षस्सकलजननयनानन्दनो नन्दनन्दनः। पुनरपि फल्गुने मासे[२८] फल्गुनसारथेरसन्निधानात् व्यसनालसा सा तमासादितुमघटितमिथुनघटन(ना)चतुरमसमशरमेव शरणमुपगता विमलसिकतालङ्कृतगृहवेदिकातलविलिखिततदीयशरीरशर[२९]चापवैजयन्ती तत्पादमूलसमर्पितषट्पदकुलाकुलपुष्पाञ्जलिरुवाचेदम्।

मणिमयगृहवेद्यां मन्मथ त्वां लिखित्वा
धनुरिषुमपि केतुं त्वत्पदं पूजयामि।
नवपरिमलभाजा नन्दगोपालसूनो-
स्सपदि घटय मां त्वं सर्वदा बाहुनैव।।१४।।

कुचयुगलमिदं मे शम्भुकोदण्डसारं
मुरमथनभुजार्हं मुग्धसद्यो[३०] विधेहि।
मदनसमुपभोग्यं मा कृथा मानवानां
मघ(मख)हविरमरार्हं जम्बुकानामिवै तत्।।१५।।

---

२३. ग.घ.च. नितान्तं सुकृशा
२४. ग.घ. तापैर्मद
२५. क. विहित
२६. ख. खेदायाम्
२७. ख. गोदायाम्
२८. च. फाल्गुनमासे
२९. ख. 'शर' इति पदं नास्ति
३०. ख. मुक्तबन्धो, ग.घ.च. मुग्धबन्धो

इति विरचितमन्मथपूजा सा परितापा सहामन्द[३१]वलमानपवमाने निजोपवने सन्त्यक्तसकलकेलिभिरालीभिः रास्त्रतमृदुलप्रवालशयनशायिनी स्तनयुगलविधृतमृणालवलया विगलितनिजवलया निजवदनेन्दुसन्दर्शनेन सङ्कुचद्भिः पर्यङ्कगतपङ्कजैः मदनसूचिततिभि[३२]रिवातिविद्धा नलिनीदलव्यजनवीजितान्तर्जाज्वल्यमानमनसि जज्वलनबहिरुदञ्चित-भस्मसञ्चयेनेव परिपाण्डरासि ते तरपक्षनिशाकरकलेवातिकृशा निश्वासोष्मग्लपिताधरपल्लवाकृष्णकथामेव कीर्तयन्ती कथञ्चिददीना दिनमनैषीत्। अरुणकरकशाभिघातत्वरिततुरगाकृष्ट[३३]रथगतिवेग-वशादिवातिदूरमतिपपाता[३४]म्बरमणिरप्यम्बरमार्गम्।
अपि च ।

निहत्य गाढं तिमिरङ्करौघैः
निजैरधास्ताद्रिगुहागतानि।
तमांसि हर्तुं किलरोषताम्रः
प्रभाकरः प्राप दिशं प्रतीचीम्।।१६।।

किञ्च।

नलिनीविरहेण नष्टकान्ति-
र्दिनकृद्रागधरोऽपि दीनचेताः।
पतितुं किल पश्चिमे पयोधौ
चरमाद्रेरथ श्रृङ्गमारुरोह।।१७।।

ततः प्रणाशोन्मुखदिनकरकरसहस्रमपहाय सकलमौष्ण्यमपि चक्रवाकमिथुन[३५]हृदयान्यवजगाहे। अभितपनमण्डलमवनिसुरकराञ्जलि-

---

३१. च. परितापमसहमाना मन्द

३२, च. मदनसूचिभिः

३३. ख. त्वरितस्तुरगाकृष्ट, घ. त्वरितं स्वतुरगाकृष्ट

३४. क. वेगवशादतिदूरमतिपपात, ख. वेगवशादतिदूरम्

३५. ख.ग.घ.च. 'मिथुन' इति पदं नास्ति

विमुक्त[३६]सकुङ्कुमार्घ्यसलिल[३७]प्रभयेवाभजत परिपाटलतामातपः। गोदावदनसौरभलोभागतैरालीकरप्रवालदूरोत्सारितैरलीभिरिवाख्यातं तद्विरहकार्श्यमवलोकितुमस[३८]हिष्णुतयेवा भवदामीलित[३९] नलिननयना नलिनी।

अस्ताचलेन्द्रशिखरप्रभवाटवीना-
मापाटलाभिनवपल्लवमण्डलीव।
सन्ध्या बभौ चरमवारिधिवारिवेगा-
मुत्कीर्ण[४०]विद्रुमलता गहनावलीव[४१]।।१८।।

रक्ता पदार्पणपटीव रराज सन्ध्या
व्योमस्थलाभिगमनोद्यतयामवत्याः।
तत्रो[४२]पचारपरिकीर्णसितप्रसून
जालश्रियं विदधतिस्म घनाश्च[४३] ताराः।।१९।।

***यादो नाथ दिशं गते रविरथेच्छायेव तस्याञ्जसा**
पश्चादेव समुत्थितातिमलिना गाढान्धकारच्छटा।
अध्वश्रान्तिवशेन युग्यतुरगैरुन्मुक्तफेनश्रियं
जग्मुः पक्वपलाण्डुपाण्डुरुचयस्तारास्तरामम्बरे[४४]।।२०।।

प्रदोषसमयसन्तोषखण्डपरशुकृतताण्डववेगविकीर्यमाण-

---

३६. ख. कराञ्जलिपुञ्जमुक्त, ग.घ.च. कराञ्जलिपुञ्जविमुक्त
३७. च. सलिल इति पदं नास्ति
३८. च. मवलोकयितुमस
३९. ख. भगवदामिलित
४०. च. उत्तीर्ण
४१. ग. गहनस्थलीव, घ. गगनस्थलीव
४२. क. तच्चो
४३. ख. वनाश्च
४४. ग.घ.च. रुचयस्तत्रोडवो व्योमनि

जटामण्डलसमुल्लसितकल्लोलिनी सलिलशीकरा इव तारकास्समदृश्यन्त। क्रमेण च[४५] कृताक्रन्देषु विघटितकोकवृन्देषु तिमिरनिर्विशेषवसनतिरोहित-देहलतिकासु निर्गतासु नियमितशुकसारिकास्वभिसारिकासु निजरमणागमनमार्गविनिहितलोचनासु विरचितमण्डनासु पुरमण्डनास्वङ्गनासु[४६] धृतदूतिकासम्प्रेषणकौतुकेषु कामकेषु तिमिरतर्जनोद्यतदहनप्रविष्टदिनकरकिरणाङ्कुरेष्विव[४७] समुदितासु दीपिकासु निशानिश्वास इव कुमुदगन्दिनि निस्सरति न भस्वति। समीरणचोरकृतमुपवनलतावधूकुसुमधूलि(ली)पटली वसनापहरणं कथयितुमिव कुहूकुहूरिति[४८] समुचितालापलीलेषु कोकिलेषु दृढतरघटितदलसहस्रकवाटां कमलनीमपहाय विघटितदलकवाटां कुमुदिनीमनुसरति कृतमधुररवे मधुकरे प्रथमगिरिकटक-तट[४९]तरुलतागहनपिहितेन शशधरशबरेण गगनवनचारितिमिरभल्लूकमल्ल-संहरणाय विमुक्तनिशितविशदनाराचेष्विव कतिपयेषूद्गतेषु किरणेषु शम्बरारिनृपनिर्गमनाय पुरन्दरदिशया चन्दनसलिलेनेव चन्द्रिकया समुक्षिते सति वियदङ्कणे कलङ्कमृगनाभीपङ्कतिलकललितमिन्द्रदिशा वधूवदनमण्डलमिव चन्द्रमण्डलमभूदभ्युदितम्[५०]।

कराग्रनखराङ्कुरैस्तिमिरदन्तिकुम्भस्थली-
र्विदार्य विशदप्रभैरुडुनवीनमुक्ताफलैः।
अलङ्कृतनभोङ्कणस्तदसृजेव चापाटल-
श्शनैरभजतोदयं तरुणचन्द्रमः केसरी।।२१।।

---

४५. ग.घ. 'च' इति वर्णः नास्ति, च. अथ
४६. क.ख. पुरमण्डनासु
४७. घ. किरणसंहतिमिव, च. किरणाङ्कुरसंहतेष्विव
४८. च. कुहुःकुहुरिति
४९. क.ख.ग.घ. तट इति पदं नास्ति
५०. च. चन्द्रमण्डलं समभ्युदितमभूत्

उदयगिरिकटकलता गृहगतानामविरतरतानाम्[५१] अमरवनितानां तिमिरयवनिकामपनयति विमलमयूखदीपेन शशिनि दोषाकरे ताभिरथ कुपिताभिस्तदुपरि सहसा याहि याहीति प्रहितमवतंसोत्पलमङ्कलग्नमिव कलङ्को विरराज।

कामस्तु कुण्डलितकार्मुक एव गोदां
लक्षीचकार निजपुष्पशिलीमुखानाम्।
मन्दानिलोऽपि मदनाग्निकरीषचूर्ण
सन्धुक्षणानि विदधे सुमनोरजोभिः।।२२।।

ततस्साश्रुं वदनं निष्यन्द[५२]मानमकरन्दमरविन्दमिव वहन्ती भवनान्तरगताऽपि जालकमार्ग[५३]समागतैश्चन्द्रकिरणजालकैः पुष्पबाणविमुक्तशिलीमुखैरिवोद्विग्नमुखी सरसचन्दनविलेपनैरनल-सारविलेपनैरिव वेपमाना मानगरलापनोदनाय मदननरेन्द्रदूतोदीरित-मन्त्रनादेनेव पुष्पशयनगतषट्पदनादेन कामराजागमनसूचककाहलीरवेणेव कोकिलारवेणापि विदलितनादपदवी विरहकृपणचक्रवाकरुदितेषु सकरुणागरलमिवाहारं भुजङ्गमिव[५४] हारं मन्वाना सविलासरासक्रीडामेव मुररिपोः स्मरजननीं स्मरन्ती मुहुर्मुहुर्मोहिता तुहिनसलिलेन समुक्षिता पुनरुशीर[५५]व्यजनानिलेन च वीजिता परिसरवर्तिनीर्बाष्प-मुखीसखीरिदमूचे[५६]।

बृन्दावनं किमकरोत्सुकृतं वयस्याः
यत्पादपल्लवतलार्पितभूरिपुण्यम्।
आदेरनङ्गशरमोहितमानसेन
गोपीजनेन सहितस्य पुरा मुरारेः।।२३।।

---

५१. क. गृहगतानामविरतानाम्

५२. ग.घ. वदननिष्यन्द

५३. च. जालमार्ग

५४. क. भुजङ्गममिव

५५. ग.घ.च. पुनःपुनरुशीर

५६. क. 'सखी' इति पदं नास्ति

पुण्यं पुरा किमचरन् भुवि गोपिकास्ता
याभिः पपे मधुरिपोरधरामृतं तत्।
या वै दधुः कुचतटेन तदङ्घ्रिपद्मं
पद्मालयाकरसरोरुहलालनार्हम्।।२४।।

किं वाऽचरत्सुकृतमालि स वंशनालो
यो माधवाधरसुधामपिबत्पुरैकः।
साधारणत्वमभजद्व्रजसुन्दरीभि-
स्संप्रार्थिता मम ममेति च या सतर्षम्[५७]।।२५।।

यच्चामृतं मुररिपोरितरैरलभ्यं
बिम्बाधरे पिबति मत्सखि पाञ्चजन्यः।
कर्पूरगन्धिसततं किमु पद्मगन्धि
किं तद्भवेदपि च सर्वरसातिशायि।।२६।।

कृष्णाङ्घ्रिपद्मपरिपूतमहीरजोभिः
अङ्गानि लिम्पत ममाङ्गजपीडितानि।
तस्यारुणाधरनिवेशितवेणुनाल
रन्ध्रोदितामृतरसैरथ वा वयस्याः।।२७।।

चन्द्रं वदन्ति विबुधाश्शिशिरं मृषेमं[५८]
मुञ्चन् तमेव मुहुरात्मकरैः कृशानुम्।
पञ्चेति हन्त कुसुमानि स[५९] पुष्पकेतो-
र्बाणानसंख्यविभवानपि[६०] वज्रसारान्।।२८।।

---

५७. ग.घ. सहर्षम्

५८. च. मृषैव

५९. ख.च. कुसुमानि च, ग.घ. कुसुमानिति

६०. ग.घ. बाणान्वपेत गणनानपि, च. बाणानपेत गणनानपि

इति कृतबहुविधप्रलापां श्लथवसनकेशकलापां बाहुलतोपधानशायिनीं रणरणकनीतनिशीथामवनिगताममरतरुणीमिव निर्निद्रा[६१]मवशनिद्रा कथञ्चित्तां हृच्छयशरप्रहारमूर्च्छेव समवाप।

ददर्श कमपि स्वप्नं तन्वङ्गी सा तदाद्भुतम्।
स्वमनोरथसिद्धीनामनुरूपमनुत्तमम्।।२९।।

ततः प्रबुद्धा तलिमात्समुत्थिता
सखिभ्य एतत्समुवाच सस्मिता।
पुनःपुनस्सा पुलकैरलङ्कृता
बहिर्गतैर्हर्षघनाङ्कुरैरिव।।३०।।

सख्यः शृणुत मम साम्प्रतमत्यद्भुतं सुस्वप्नम्। अद्य खल्वपरिमितविद्रुमस्तम्भे विनिहितपूर्णकुम्भे निखात[६२]कदलीस्तम्भे मणिभित्तिविचित्रिते मरतककृतसोपाने स्फटिकशिलामयकुट्टिमे जाम्बूनदवर्णविचित्रितवितानलम्बितजम्बीरफलकुहली मुक्तादामनि च[६३] हेममण्डिते मण्टपे मुरशासनस्मरशासन[६४]वलशासनकमलासन-प्रमुकसकलसुर[६५]समवेतो धृतबहुविधभूषो विरचितविवाहवेषस्यमेत्य मां मनसि च करे च धृतकौतुकाम् अभिनवचन्दन[६६]कुङ्कुमपङ्काङ्कितकुचस्थलीं मन्त्रवसनेन निजमणिमकुट[६७]मकुटमन्दारमालया च समलङ्कृत्य वसिष्ठप्रमुखमुनिवरिष्ठकृतस्वस्तिवचने निर्दयप्रहतमद्दले

---

६१. च. निद्रा
६२. च. विनिखात
६३. च. च इति वर्णः नास्ति
६४. ग.घ.च. जलजासन
६५. च. सकलसुरप्रमुख (पदविपर्ययः)
६६. क. 'चन्दन' इति पदं नास्ति
६७. क.च. 'मकुट' इति पदं नास्ति

निश्शङ्काध्मातमङ्गलशङ्खे नटनर्तकीजनप्रवर्तित[६८]बहुविधनृत्ते सुमुहूर्ते दाशरथिरिव मैथिल्याः पाणिं मे भगवान् जग्राह।

हुत्वा हुता शमवलम्ब्य ममाग्रपाद-
मारोप्य चाश्मनि करेण समन्दहासः।
पर्याणयन्ननलमालि स मां विलासि
मत्पाणिना तनुत लाजविमोक्षमग्नौ।।३१।।

ततो वसिष्ठः प्रमुखैर्मुनीन्द्रैः
प्रयुज्यमानं प्रियबन्धुभिश्च।
एकासनस्थौ विधिवत्सभाया-
मार्द्राक्षतारोपणमन्वभूव(ताम्)।।३२।।

तदनु मया सह स सिन्धुरस्कन्धाधिरूढः कृतनगरप्रवेशः संवेशभवने शयनतलं प्रविवेश।

तस्मिन् क्षणे हन्त ममालिनिद्रा
मुद्रा विमुक्तं नयनं बभूव।
मनो मदीयं सहसैव[६९] गृह्णन्
मायावटुस्सोऽपि तिरो बभूव।।३३।।

हा तं न पश्यामि हरिं वयस्ये
हा मन्दभाग्यास्म्यहमङ्गनासु।
स्वप्नेऽपि हा मे सहते न सङ्गं
क्रूरो विधिः कैटभशासनेन।।३४।।

इति सहृदयसखीनामुदीरितस्वप्नवृत्तान्ता रन्ध्रान्वेषी कुसुमशरशबरनीरन्ध्रशरसारपरिपीडिता कृष्णसारविरहिणी हरिणीव

६८. च. नटनर्तकीजनप्रवृत्तित
६९. च. सहसेव

शरणमभिलषन्ती मुहुर्मुहुर्निश्श्वसन्ती श्वसनाकम्पितकदलीव कम्पमाना विगलितमाना मोहवशेन चिन्तापथचारिणं मुकुन्दमेह्येहि[७०] नाथ[७१] मामनाथां पाहि पाहीमं जनं विहाय क्व यासि क्व यासीति प्रलपन्ती तमालिङ्गितुं प्रसारितबाहुलता तदङ्गसङ्गालाभेन[७२] व्रीलिता वञ्चना किमु पञ्चशर[७३]माया किमायामवती[७४] किमिदमिति ध्यायन्ती पुरमथनफालानलदग्धकुसुमकेतोः पुनरपि जननहेतुमकरुणं नन्दतनयममन्दभागधेयतयाऽत्मानमपि नन्दन्ती सा[७५] पुनरिदमवादीत्।

आलि षोडशसहस्रगोपिका
***रासकेलिरसिकाः प्रलोभयन्।**
यो जहौ निशि स मादृशां विटः
किन्नु विश्वसितुमर्हतीदृशः।।३५।।

अयमपि पञ्चशरवञ्चकः पक्षपाती लक्षीकरोति मामेव बहुमुखानाम्। निजपुष्पशिलीमुखानां[७६] न तादृशं कितवम्।

किं नास्ति निद्रा सखि ! पुष्पकेतो-
र्न किं शराणामवसानमस्य।
अनारतं बाणविमोचनेन
किमस्य बाह्वोरथवा न बाधा।।३६।।

---

७०. क. मुकुन्दमभ्येहीति
७१. क. 'नाथ' इति पदं नास्ति
७२. च. तदङ्गसङ्गमालापेन
७३. ख.ग.घ. पाञ्चहारी
*'ग' मातृकायां चतुर्थस्तबके इतः विषयः नोपलभ्यते।
७४. च: किमु यामवती
७५. च. सा इति पदं नास्ति
७६. ख. 'निजपुष्पशिलीमुखानाम्' इति पदं नास्ति

किं कोकिलानाङ्कुररीगणाना-
मालापभङ्गो न कदापि भूयात्।
इयं त्रियामा किमनन्तयामा
नियन्त्रिता दुर्विधिना मदर्थे।।३७।।

इति कृतपरिदेवनामेनामालोक्य सपरितापामनुतापवशा दिव(वा) निशा कथं[७७] कथञ्चिदयासीदवसानम्। तयेति-निवेदितं स्वप्नवृत्तान्तं निवेदयामासुरालीजनाः प्रमुदितचित्ताय विष्णुचित्तायै(य)।

इत्थं व्रतेन चरितेन तथोपवासैः
लब्ध्वा न कृष्णमलसादयितुं कृशाङ्गी।
संसेवितुं सपदि रङ्गिणमार्द्रताऽपि[७८]
गोदागुरोरनुमतिञ्चकमे सखीभिः।।३८।।

इति गोदापरिणये चम्पूकाव्ये चतुर्थस्तबकः। गोदायै नमः।।

---

७७. घ.च. 'कथं' इति पदं नास्ति
७८. घ.च. रङगिणमादरेण

पञ्चमः स्तबकः

श्रीविष्णुचित्तोऽथ सहैव शिष्यैः
श्रीरङ्गसेवा विहिताभिलाषाम्।
सार्थं सखीभिश्चतुरन्तयान -
मारोप्य गोदामनघः प्रतस्थे।।१।।

नित्वोपकण्ठं मधुरानगर्याः
निजप्रभावेन जितालकायाः।
केयं पुरीत्येषकृतानुयोगा -
मालोक्य गोदां मुनिराबभाषे।।२।।

वत्से इयं खलु मधुरेति नाम नगरी।

विद्याधरैरपि सुवर्णमयैर्विमानै -
स्तन्वीभिरप्रतिमरूपमनोरमाभिः।
संसेविता सुरपुरीव चकास्ति सैषा
पुण्यातिरेकसुलभा पुरहूतहृद्या।।३।।

अत्र[१] खलु निवसति कुलदैवतञ्चन्द्रकुलतिलकानामहितयशसां महामहीपतीनां व्यूहसुन्दरो नाम हरिः।

पाण्ड्येश्वरस्य परतत्वविनिश्चयार्थ -
मत्रागतोहमरविन्ददृशः प्रभावात्।
अग्रे समस्तविदुषामहरं हि विद्या
शुल्कं विजित्य कुमतीञ्छुचिभिः प्रमाणैः।।४।।

अस्यास्समीपे प्रवहति सेयं खलु वेदवती[२]।

१. च. अद्य
२. ख.घ.च. वेगवती

सैषा सखीव तटिनी स्वतरङ्गहस्तै -
रस्यै[३] ददाति मणिमौक्तिकचन्दनानि।
पक्वानि नीरजफलानि तथा हरिद्रा -
मार्द्रानिलैरपनयन्त्य(त्य)हिमांशुतापम्।।५।।

उत्तरतो निर्दिश्य।

पश्याग्रतः पर्वतराजमेनं
वनाद्रि नामा गिरि[४]रेष वत्से।
अमुष्य शृङ्गे खलु रिङ्खणानि
करोति चन्द्रस्कलितोडुबृन्दे।।६।।

अस्य च[५] कटकान्तरेषु सञ्चरतः कालाञ्जनरुचिमेचकानतिधीरवान् करिण इव मदजलासारमुचः पयोमुचोऽपि समभिपतन्ति निशितनखराङ्कुशाः निरङ्कुशाः पञ्चमुखाः।

निवसन्त्यमुष्य मणिकन्दरोदरे
सह सुन्दरीभिरमरानिरन्तरम्।
मणिदीपकान्तिमहिते तिरोहित(ते)
प्रतिहारसीम्निपटलैः पयोमुचाम्।।७।।

अचलमभितः प्रभूतपद्मरागमरत*कनीलोत्पलनिकरसङ्कर-समुचितेन्द्रायुधरुचिमतिमेचकमनवरतनिकुञ्जसञ्चारिसुरकामिनी तटिल्लत[६]-मनारतगलदम्बुधारमम्बुधरमिति शङ्क्यं[७] मुहु[८]रकाण्डेऽपि ताण्डवमाचरन्ती वनशिखण्डिनां[९] मण्डलानि।

---

३. क.ख.ग. अस्याः ४. ख.घ. हरि
५. ख.घ. 'च' इति वर्णः नास्ति
* 'ग' - मातृकायाः एकविंशत्तममातृका आरभ्यते
६. ख.ग. लत, घ. विद्यल्लत ७. च. आशंक्य
८. च. मुहुर्मुहु ९. च. वनुशिखण्ड

अर्कांशुतापैरभितः प्रणुन्ना -
च्छाया तरुच्छन्नमिमं प्रपन्नाः।
गाडान्धकार इव गह्वरेषु
भल्लूकमल्लाः परितश्चरन्ति।।८।।

अत्र च मृगया विहारेषु वनेचरा निजतरुणीभिरेव करिणीगमनाभिः करिणीर्हरिणीनयनाभिर्हरिणीश्चमरीवालकुल[१०]रुचिरकबरीभि[११]श्चमरीभिरपि विमोहयन्तो जीवग्राहं गृह्णन्ति। अस्य कटके खलु प्रवहन्ती[१२] निकटगतहरिचन्दनागरु[१३]विटपि समाकर्षणी(णि)तटबालातपे तरङ्गलहरी करतलप्रसारितसलिलार्द्रमणिमुक्ता प्रकारा चपलवानर[१४]कुलकम्पितजम्बू-पनसचूततरुनिष्यन्दमानफलसारमेदुरा पावन[१५]विमलयशोनिधिमलय-ध्वजसमाधिमहिमसमाहूता परिपाण्डरनिजफेनपिण्डपटलेन परिहसन्त्येवेतर[१६]स्रवन्तीराप्लुत[१७]जनषडूर्मिकापहेन शिशिरशीकरनिकरवहेन गन्धवहेन तटनिकुञ्जगतसुरयुवति[१८]मञ्जुमुखघर्मजलकणहरणनिपुणा कमलकल्हारकुमुदकुवलयकुवलयपुञ्जिता[१९] मञ्जीरसिन्धुरिति मथीकृतमन्दाकिनी वैभवा भगवती कापि द्वीपवती।

---

१०. ख.ग.घ.च. 'कुल' इति पदं नास्ति
११. ग.घ. रुचिकबरिभि
१२. ख.ग.च. प्रवहति
१३. ख.ग.च. हरिचन्दनचन्दनागरु, घ. हरिचन्दनचन्दनातरु
१४. ग.घ. चपला नर
१५. ख.ग.घ. मेदुरापा, च. पावन इति पदं नास्ति
१६. च. परिहसन्तीवेतर
१७. ग. स्रवन्ती नाप्लुत, घ. स्रवन्तीरनाप्लुता, च. नदीस्रवन्तिराप्लुत
१८. च. युवतिजन
१९. ख. कुवलयपुन्नरञ्जिता, ग.घ.च. कुवलयपुञ्जरञ्जिता

भृङ्गीगीतैरधिकमधुरैः कीटकोपाङ्गनादै -
रस्मिन् सार्धं जलदपणवारावभेदैरजस्रम्।
लास्यं लोलत्करकिसलयं[२०] बालवल्ली नटीनां
मन्दं मन्दं दिशति पवनो दक्षिणस्सूत्रधारः।।९।।

वत्से व सत्यस्य तटे वनाद्रे -
स्सुसुन्दरस्सुन्दरबाहुना मा।
अलङ्करोत्येनमपत्यमब्धे -
रङ्गीश्रिया सुन्दरवल्लरीति।।१०।।

तस्येदमतितुङ्गमष्टादशसोपानविभूषितद्वारं मणिगोपुरमालक्ष्यते कुरुशिरसा प्रणिपातं।

श्रुत्वा पितुर्वचो गोदा नत्वा तुङ्गवनाचलम्।
विलङ्घ्य गोपुरद्वारं विवेश हरिमन्दिरम्।।११।।

अलकसुन्दरमाननसुन्दरं
नयनसुन्दरमंससुसुन्दरम्।
चरणनाभिसरोरुहसुन्दरं
विनमतिस्म हरिं करसुन्दरम्।।१२।

सा दृष्टमात्रे सहसैव तस्मिन्
मनोभवाक्रान्तमना बभूव।
पार्श्वे तु संवीक्ष्य पयोधिकन्या -
मासीत्सलज्जा पुनरायताक्षी।।१३।।

ततस्तच्चित्तवेदी विष्णुचित्तस्तामानयदविरलनालिकेरक्रम-ककुहलिकापरिमलकबलितदिगन्तरं कलमयवसापनयनचपल-कृषीवलविलासिनी जननयनप्रतिबिम्बेन सह विहरमाणमीनकदम्बकमिक्षु-

२०. ग. लोलं किसलयकरं, घ. लोलं किसलयकरा

च्छायाश्रिताभिस्तन्मुक्ताफल[२१]विमलसिकता विरचितगृहलीलाभिः कलमगोपिकाभिः कृतकलगानाकर्णननिश्चलकृष्णसारहरिणमण्डलं चोलमण्डलम्।

दर्शयित्वा ततस्तस्या दिविषद्वाहिनी निभाम्।
कावेरीं कमनीयाङ्ग्याः कन्याया मुनिरब्रवीत्।।१४।।

वत्से विहङ्गनिनदैरिव ते वदन्ती
प्रत्युद्गता च सहसा[२२] प्रणयार्द्रवाचम्[२३]।
सैषा कवेरतनयाचलवीचिहस्तैः
पर्युत्सुकाद्य भवतीमुपगूहतीव।।१५।।

वत्से योषेव[२४] सैषा कनकतटिनी कनकमणिमुक्ता निकरभूषिता[२५] सरसहरिद्राचन्दनधारिणी सह्यकटकचारिणी स्त्रीधनमिव करिकलभानानयन्ती तरङ्गकरापहततटली कुचकदली पनसचूतक्रमुकनालिकेरजम्बूफलताम्बूला केतककुरवककुन्दचम्पक[२६]कुटजजाती मालती कुसुमकोरकवाहिनी सौगन्धिकसमलङ्कृतशैवालकबरभरा निजागमनमार्गोन्मुखपतिसङ्गमोत्सुकेव व्रजन्ती मध्येमार्गमहीपतिभोगशयने सिन्धु[२७]राजतनयया सह विहरन्तं रुचिरमवेक्ष्य जामातरमतिबहलया[२८] व्रीलयेव द्विधा भिन्नमात्मानमुद्वहन्ती परिहृत्य दरतस्तत्प्रदेशं पुनरपि सा तङ्केव सशङ्केव[२९] व्रजति सरभसम्। तामिति तेन दर्शितामतिलङ्घ्य

२१. च. मुक्तमुक्ताफल
२२. ग.घ.च. बहुविधा
२३. ग.घ. वाचः, च. वाचा
२४. ख. योषैव
२५. च. निभूषिता
२६. च. केतककुरवकमरुवककुन्दतिन्दुचम्पकचाम्पेय
२७. ग.घ. भोगशायनमसिन्धु
२८. ख. बहुलया
२९. च. सशङ्केव इति पदं नास्ति।

तस्यास्सैकते संशोभिते शमितसकलपातके तपनीयगोपुरप्राकारकिरण-प्रकरतिरोहितदिवाकरामारामतरुसञ्चयनिवारिता तपसञ्चारामञ्जित-शुकसा(शा)रिकाप्रपञ्चैरभ्यस्यमानपराङ्कुशपरकालप्रमुखमुनिवरभारती माधुर्यजनितजनकर्ण[३०]रसायनामतिप्रमदाकुलकोकिलकुलोदीर्यमाण-कुमतिबाह्यकुदृष्टमुखदृष्टादि गजमृगराजायितयतिराजराजकीर्ति-बिरुदावलीमखिलमनुजनयनगोचरपरमपदशङ्कामङ्कुरयन्ती-मभङ्ग[३१]मङ्गलनिलयां रङ्गमिति प्रथितां राजधानीमद्राक्षीद्वामाक्षी।

***अथ तां विवेश्य तटिनीतटे मुनि -**
स्तनयां स्वशिष्यनिवहेन रक्षिताम्।
अघमर्षणार्थमभजत्तरङ्गिणी -
ममृतातिशायिरसवारिमेदुराम्।।१६।।

सा शिष्यवर्गैश्शिबिकान्तराला -
त्सदृश्यमानैव तिरो बभूव।
संवीक्षिता चातकलोक[३२]नेत्रै -
स्सौदामिनीवाम्बुमुचां कदम्बात्।।१७।।

अदर्शनेन तस्याः कृतकलकलेषु ससम्भ्रमेष्वितस्ततो विचिन्वत्सु शिष्येषु निर्वृत्तितनिजमाध्यन्दिनवृत्तः प्रतिनिवृत्तो विष्णुचित्तश्शून्यां शिबिकामवलोक्य नष्टधन इव शोकाविष्टः पतितोत्पतितो नयनजलैरवनितलमभिषिञ्चन्नन्तिकगता रामपादपानेवं पप्रच्छ।

पुन्नागकुन्दसहकारतमालजम्बो
चाम्पेयचन्दनकदम्बककोविदाराः ।

---

३०. ख. खण्ठ

३१. च. अभङ्गुर

*घ. मातृकायां विषयः इतः आरभ्य नोपलभ्यते।

३२. ग.च. जन्तु

युष्माभिरद्य किमदर्शि सुता मदीया
निर्निद्रपुष्पनयनैरपि दुष्प्रचारैः ।।१८।।

इति बहु विलप्यैतत् निवेदितुमेव[३३] हरेस्सदनं प्रविश्य कनकमयविमानमञ्जूषिकान्तर्गतमरतकमणिमिव भूषणमणिकिरण-चक्रचापरुचिमम्बुधरमिव चरणाम्बुजधृतमञ्जुमणिमञ्जीरमञ्जितकाञ्ची-कलापमपरसन्ध्याम्बुधररुचिरुचिरपीताम्बरमम्बुजभवनजननसदन-कमलसुरभितनाभिमतिमनोहरमणिविमलसलिलकणजालसमङ्कृतोर-स्थलकमलिनी पलाशपेशलमुपधायैकमपरमपि बाहुमखिलभुवनभरण-धुरीणमणिस्तम्भमाजानुलम्बं विधाय शयित[३४]मंसाभ्यर्णगतकर्णपाशमा-नीलकेशशैवाललोलमकरमकरकुण्डलमुदयगिरिशिखरगतशिशिरकररुचि-वदनमतिविशददशनरुचिमिलितललितहसितमरुणजलजनयनं महिम[३५]करसममणिमकुटमरीचिनिचयकपिशितदशदिशं समवायमिव सौन्दर्याणां सन्निधानमिव नेत्रतपः फलानां निधानमिव समाधिनिरतानां दयालुमपि पुण्यजनबाधकं पुराणमपि युवानं जगत्प्राणबन्धु[३६]मप्याश्रित-पालनमेव कुर्वाणं शयानमपि[३७] जागरूकमतिबहुल[३८]करुणामृतप्रवाहापाङ्गं रङ्गपतिमप्यखिललोकेशं हृषीकेशमालुलोके।

पार्श्वे वसन्तीं परमस्य पुंसः
पर्यङ्कदेशे स ददर्श बालाम्।
आशङ्क्य तां वारिदमभ्युपेता -
मानीलबर्हामिव नीलकण्ठीम्।।१९।।

---

३३. च. निवेदयितुमेव
३४. ग. शयान
३५. क.च. अहिम
३६. च. जगत्प्राणबन्धन
३७. ग. सुप्तमपि
३८. च. बहल

गोदानुरूपवरसङ्गमजातहर्षः
श्रीविष्णुचित्तमुनिरित्यवदत्प्रणम्य।
उद्वाह भाव्यमुभयोरपि रम्यवेषं
प्रक्षालयन्निव निरीक्षितुमक्षिबाष्पैः।।२०।।

भगवन्निखिलकुल[३९]धर्माचारसंस्थापनचतुरत्वयो मामस्मत्कुलानुचितेन[४०] विवाहेन परिणेतुं साम्प्रतमसाम्प्रतम्[४१]। द्विजकुलोचितेन विवाहेन दैविकेनैव बालिका[४२] मे[४३] परिणेतव्येति।

श्रुत्वा वचो मुनेस्तस्य श्रुतिमार्गरसायनम्।
प्रत्युवाच हरिः प्रीतिं पुलकैस्सूचयन्निजाम्।।२१।।

उद्वाह मङ्गलविधेरुचितोपचारो
निर्वर्त्यतां[४४] नगरमेत्य निजं त्वयैव।
तत्राहमेत्य दुहितुस्तव विष्णुचित्त
पाणिग्रहं सदसि बन्धुयुते करिष्ये।।२२।।

इति भगवता नियुक्तो[४५] विष्णुचित्तः पुनरपि सुतया सह निजनगरं प्रविश्य उद्वाहोचितं मङ्गलकृत्यं कर्तुमारेभे। ततश्चोपलिप्यमानमणिकुट्टिममुत्सृज्यमानचन्दनसलिलमुन्नह्यमानमणितोरणमालिकमुदञ्चमानकनकदण्डमुक्तातपत्रमुद्धूयमानकेतुवसनमुद्धूप्यमाना गरुगुग्गुलुपटलमुद्दीप्यमानदीपिकाशतं निखन्यमानसकुसुमफलकदलिका कण्डं निधीयमानमरङ्गलकलशं[४६] निक्षिप्यमाणाङ्कुरपालिका प्रतिसरकुम्भ-

३९ क. भगवन्निखिल
४०. च. मामस्मत्कुलोचिते
४१. च. साम्प्रतम्
४२. च. बाला
४३. च. मे इति वर्णः नास्ति
४४. क.च. निर्वृत्यताम्
४५. च. नियुक्तो प्रीतियुक्तः
४६. च. निधीयमानमङ्गकलशम्

मालिख्यमानभित्तितलमाबध्यमानमुक्तादामाभिरामवितानकमलं क्रियमाणकौतुकभवनमानीयमानदूरवर्तिबन्धुजनमनुनीयमानकलहायितदायादम् आध्मायमानमङ्गलशङ्खमाहन्यमानमुरजपटहतूर्यवाद्यमभिवाद्यमाना तोद्यवेणुनालमाघट्यमानसल्यतालमङ्गीक्रियमाणसङ्गीतमारभ्यमाणनृत्तभेदमभ्यस्यमान-मद्दलनादमभ्यर्च्यमानोद्वाहदैवतमाभोज्यमानपूज्यद्विजकुलमतिचपलमौहूर्तिका-वेक्ष्यमाणसुमुहूर्तवेलमालोक्यमानवरागमनमार्गमितस्ततःपलायमान[४७] सकलजनकृतकोलाहलमित्थमभूद्विष्णुचित्तभवनाङ्कणम्। अथ तामलङ्काराणामप्यलङ्क्रियां मङ्गलमित्यलङ्कृताञ्चकार चञ्चलाक्षी जनः।

सिन्दूररेणुभरितासु ततो रराज
सीमन्तमध्यपदवी मुखकान्तिसिन्धोः।
आनीलकेशभरशैवलमध्यरूढा
बालप्रवाललतिका परिपाटलेव।।२३।।

मध्यं भ्रुवोर्मण्डयदर्ध्वपुण्ड्रं
रराज तस्याः दिवि राहुभीत्या।
शरासनाभ्यन्तरलीयमाना
शशाङ्कलेखेव मनो भवस्य[४८]।।२४।।

सान्द्राञ्जनेनाञ्चितमक्षितस्याः
सखीजनो वीक्ष्य मुहुश्शशङ्के।
सम्मोहनायैव हरेः स्मरेण
शरं स्वकस्तूरिकयेव दिग्धम्[४९]।।२५।।

---

४७. ग. परितोषयापमान, च. याचमान
४८. ख. भवन्ती
४९. ग. स्वकस्तूरिकया प्रदिग्धं

निसर्गरक्तेऽप्यधरे नताङ्ग्या:
निवेशितेनारुणयावकेन।
बालप्रवालो परिलीयमान
बालातप श्रीः परमन्वकारि।।२६।।

माणिक्यमालाञ्चितमौलिभागं
मनोज्ञदूर्वाङ्कुरकर्णपूरम्।
ताटङ्कसंशोभिमुखं तदीयं
विशेषकेणापि बभौ विशेषात्।।२७।।

आलिप्तकुङ्कुमरसावतिमनोहरहारौ तत्पयोधरौ जितनक्षत्रमालिकावपजितगिरिशृङ्गडम्भौ कुम्भा[५०]विवरे जाते कृतहरिचन्दनानुलेपना कनकाङ्गदकङ्कणविद्रुमभूषाङ्किता[५१] तदीया बाहः[५२] पाणितलरागमिषादासन्नलाजमोक्षानुरागं बहिरुद्गिरन्तीव चकाशे।

तन्वङ्ग्यास्तनुरानीला रत्नकाञ्च्यानुरञ्जिता।
चकाशे चक्रचापेन मेघलेखेव मेचका।।२८।।

सितदुकुलधारिणी श्यामलतनुरुचिरुपरि[५३]विसर्पिसान्द्रतर-चन्द्रिकासौधहरिनीलसालभञ्जिकेव चकाशे।

आमुक्तनूपुरमलक्तकपाटलाभं
रत्नस्थलीषु निदधे रमणीयमङ्घ्रिम्।
अश्माधिरोहणमवश्यविधेयमेव
सा दुष्करं स्वयमिवाभ्यसितुं पुरस्तात्।।२९।।

---

५०. ग. च. कुम्भिकुम्भा
५१. च. भूषिताङ्गिता
५२. ख.ग.च. बाहा
५३. ग.च. रुचिरियमुपरि

इति धृतमण्डनायां तस्यां रङ्गभर्तुरनागमनेन सीदन्त्यामपि परिणयवेलायां विषण्णचित्ते विष्णुचित्ते सदसि सन्निविष्टेषु समाहृतसमित्कुशपलाशाज्यसिकतालाजेषु द्विजेषु[५४] प्रतिपालयत्सु सपदि विहगराजाधिरूढो रङ्गराजो विरचितविवाहा कल्पः संसर्पत् कनकगिरिशिखरगतमरतकमहाशैलकल्पो गगनतलमभितो विराजयन्नाजगाम।

वरस्य तस्याथ वधूवयस्याः
नीराजनं नीरजलोचनस्य।
प्राक् द्वारदेशे प्रणयेन चक्रुः
कर्पूरदीपैर्गलदुत्तरीयाः ।।३०।।

रङ्गेश्वरं तं रमणीयवेषं
पार्षद्वधौ[५५] वीक्ष्य परं प्रहर्षम्।
जीमूतमालोक्य चिराय पङ्क्तिः
पर्युत्सुकानामिव चातकानाम्।।३१।।

आमुक्तरत्नकटके लसति प्रकोष्ठे
वैवाहिकासनगतस्य वरस्य तस्य।
वेदोदितेन विधिनैव सभासदस्ते
चक्रुस्तदा कनककौतुकसूत्रबन्धम्।।३२।।

तदनु च वदनप्रकटितमोदायाः गोदायाः[५६]।

श्रीविष्णुचित्तश्शिशिरैः पयोभिः
प्रक्षाल्य पादौ परमस्य पुंसः।

---

५४. क. 'द्विजेषु' इति पदं नास्ति
५५. ग.च. संसद्वधौ
५६. च. एतद्वाक्यं अस्यां मातृकायां नास्ति

करे गृहीत्वा कमलामिवान्यां
कन्याञ्च तां गद्गदमित्यवादीत्।।३३।।

संवर्धिता तवैवेति सैषा रङ्गपते मया।
गृहीत्वा पाणिमस्यास्त्वं गृहमेधी सुखी भव।।३४।।

इति प्रणयवानुक्त्वा गतिमात्मविदां हरिम्।
कन्यकामदिशत्तस्मै पुण्यकृन्मुनिपुङ्गवः।।३५।।

तस्या मुखं वीक्ष्य समन्दहासं
तयेक्ष्यमाणश्च सराजहंसः।
करेण जग्राह करं तदीयं
करी करिण्या इव रङ्गधामा।।३६।।

स पुलको वरकरप्रकोष्टस्सस्वेदाङ्गुलीदलो वधूकरश्च परस्परसंस्पर्शसुखमिवानुबभूवतुः। अथ विधिना स्थापितपरिधिपरिस्तरणास्त्रतपार्श्वभूमिस्समभ्यर्चितवेधसा पुरोधसा नियुक्तेन विष्णुनाहूतो[५७] हुताशनः प्रदक्षिणार्चिर्जज्वाल।

आलम्बिते निजपदे तु करेण विष्णो -
रारोपितुं दृषदि सा समृदुस्मिता भाक्।
सान्द्रानुरागदिनकृत्करलम्ब[५८]माना
सम्फुल्लपद्मवदना सरसीव तन्वी।।३७।।

आरुह्य सा काञ्चनरत्नरम्य -
मश्मानमाविष्कृतभागधेयम्।
प्रालेयशैलेन्द्रशिलाधिरूढा
गौरीव रेजे कृतमण्डनश्रीः।।३८।।

---

५७. ख.ग.च. तेन हुतो
५८. ख.ग.च. लम्ब्य

उदचिषं सप्तार्चिषमुच्चलित[५९]धूमलेखमभिवर्तमानतन्मिथुनमुद्गतधूलीपटलमुल्लं मधुकरबृन्दमरुणारविन्दमभितश्चरन्द्राजहंसमिथुनमिव विरराज।

प्रत्येरिता पाणितलेन बालिका
मुमोच लाजां मुहुरुच्छिखे नले।
मरुत्प्रयुक्ता लतिका सपल्लवा
मनोज्ञपुष्पाणि यथा मणिस्थले।।३९।।

तदा[६०] तदीय कराञ्जलिसमुदञ्चितलाजपुञ्जः पावकमुखे जलनिधिवेला वेगास्फालनविदीर्यमाणमुखशुक्तिकोशपुटमुक्ता मुक्तावृष्टिर्विद्रुममण्डल इव निपपात।

आरक्तगण्डस्थलमाविलाक्ष -
माविश्रव्याम्भः[६१] कणमङ्गनायाः।
आमृष्टपाटीरललामधूमै -
रासीन्मुखं म्लानदलावतंसम्।।४०।।

अन्योन्यभावावबोधायापाङ्गदेशसञ्चारिताः सञ्चारिण्य इवालोकलीलाः परस्परं तयोरनुरागमाचख्युः।

समापिते कर्मणि दंपतीतौ
समास्थितौ रत्नवदासनाग्रे।
सहाक्षतैस्सद्भिरथ प्रयुक्त -
माशीर्वचो मङ्गलमन्वभूताम्।।४१।।

अथ वधूवरौ वरवारणस्थितौ मुक्तातपवारणच्छटा-

५९. च. सप्ता च षेमुच्चलित
६०. क.ख.ग.घ. तदा इति पदं नास्ति
६१. च. आविश्रमाम्बः

कृतच्छायोत्तमाङ्गौ उभयपार्श्वपूर्णसितप्रकीर्णकौ[६२] अनुगतजनकोलाहल-तुमुलभेरी मद्दलशङ्खकाहलरवपूरितमन्दिरोदरां प्रतिभवनद्वारं विनिहितदीपोपायनपूर्णकुम्भामम्बरतललेहिपताकातिरोहितातमुच्छ्रितमत्तवारणाव[६३]बद्धतोरणमालिकामभिनवहिमजलचन्दनवारिभिरभ्युक्ष[६४]माणां कणामतितुङ्गप्रासादशिरोऽधिरूढपौरकन्यकाकरावकीर्यमाणलाजकुसुमहरिद्राचूर्णमुष्टिदृष्टिप्रियां[६५] नगरवीथीमवजगाहाते।

प्रस्थानमाकर्ण्य तयोः प्रमोदा -
दभ्युद्य(त्थि)तानामवलोकनाय।
पौराङ्गनानां परिहासयोग्या -
श्रेष्टा बभूवुर्बहु सम्भ्रमेण।।४२।।

लाक्षारसं काचिदुरोजकुम्भे
पादाम्बुजे कुङ्कुमपङ्कलेपम्।
कस्तूरिकां चक्षुषि कर्णमूले[६६]
कालाञ्जनं सम्भ्रमतश्चकार।।४३।।

कपोलदेशे तिलकं विधाय
करेण फाले ऋजुपत्रलेखाम् ।
काञ्चीकलापं कुचयोः प्रतस्थे
काचिन्नितम्बे विपुले च हारम्।।४४।।

---

६२. ख. पूर्णमासि मानतप्रकीर्णकौ, ग. पूर्णिमानसितप्रकीर्णकौ
६३. क.ख.ग.घ. व इति वर्णो नास्ति
६४. ग. क्ष्य, च. त्क्ष्य
६५. ख. चूर्णमुष्टिप्रियां, ग. चूर्णमुष्टिवृष्टिदृष्टिप्रियां
६६. ग. कण्ठ

मञ्जीरमेका महिला स्वपाणौ
मनोरमं कङ्कणमेव पादे।
विन्यस्य वेगेन विनिर्जगाम
व्यत्यस्तसंव्यानदुकूलचेला।।४५।।

काचन दुकूलधारिणी लाक्ष(क्षा)रसारुणचरणा मन्दं[६७] चरन्ती शशिकला धवला लोहितचरणा राजहंसिकेव कमलमाससाद प्रासादम्।

काचिद्गलन्तीं गति सम्भ्रमेण
चकर्ष काञ्चीं चरणान्तलग्नाम्।
उत्तुङ्गपीनस्तनकुम्भरम्या
स्वशृङ्खलां मत्तगतिर्वशे च[६८]।।४६।।

सरभसमभिगन्तुं सम्प्रवृत्तैव काचित्
स्तनगिरिभरखेदान्नप्रयातुं शशाक।
अतिकठिनगुणानामस्थिरौन्नत्यभाजां
वहनमपि विघातस्सत्यमिच्छाप्रवृत्तैः।।४७।।

कस्याश्चिदकृतपुष्पोपचारमेव सौधमार्गमधिरोहन्त्यागमनवेगश्छिदुरा(र)हारलतया विगलितमुक्ताफलैरनुपदमाचचार पुष्पोपचारविधिम्। काचन सरभसगतिविगलितां निजनीवीं बद्धुं कबरभरे प्रसारयामास करं कबरबन्धनायापि नीवीबन्धे।

प्रासादमारुह्य ततो वधूनां
वधूवरालोकनतत्पराणाम्।
समानसं बन्धविवेकिनीनां
बभूवुरन्योन्य कथा प्रसङ्गाः[६९]।।४८।।

---

६७. क.ख.ग.घ. मन्दं इति पदं नास्ति
६८. ख.ग. मत्तगतिर्वशे व, च. मत्तगतिर्विवेष
६९. ग. विचित्राः

सैषाभिलाषेण सहस्य मासे
सुदुस्तरं यद्व्रतमाचचार।
स्थाने तदस्यालिवरस्य रूप -
मेतादृशं वीक्ष्य तु का न मुह्येत्।।४९।।

गुणेन रूपेण विचेष्टितेन
शरीरकान्त्या वयसा नवेन।
एनामसावर्हति रङ्गनाथो
गोदा च सैषा सखि नूनमेनम्।।५०।।

सखिचरणसरोजादस्य जातसृवन्ती
शिशिरकिरणमौलेश्शेखरत्वं जगाम।
सकलजलनिधीनामेककाले[७०] सहस्रं
निवसति जगदस्यैवोदरे निर्विघातम्।।५१।।

गोत्रारिदुश्चरितकोपिततापसेन्द्र
शापोपशान्तिकरणे चतुराकृतीनाम्।
अस्यैव पादरजसां समनुग्रहेण
काचिच्छिलापि सहसैव बभूव दोषा[७१]।।५२।।

एनं हि मात्र वरविह्वलता तवाक्या -
त्कान्तारमध्यगमनोद्यतमन्वियाय।
सीता पुरा मणिमहीतलचङ्क्रमैर -
प्यालोहिताग्रचरणाम्बुरुहा नु रागात्।।५३।।

अस्याङ्गसङ्गमसुखस्पृहयैव पूर्व -
मग्नौ पपात सखि वेदवतीति कापि।

---

७०. ख.ग.च. नामैक्यकाले
७१. च. योषा

हस्तावलम्बि[७२]नमपि प्रसभं[७३] विधूय
कैलासशैलचलनातिपटुर्निशाटम्[७४] ।।५४।।

भूषाम्बरादिरहितं फलमूलपर्णै-
र्देहस्थितिं रचयत[७५]स्सखिदीनदीनम्।
अस्यापि वीक्ष्य शुचितापसवेषमासी -
त्कामातुरा निशिचरी[७६] खलु दण्डकायाम्।।५५।।

यत्पादपद्मयुगमालिसमाधिभेदै -
स्सञ्चिन्तयन्ति मुनयो गतरागमोहाः।
अस्याश्चकार स पुमान्यदुपेत्य साक्षा -
त्पाणिग्रहं तदिह भाग्यमवर्णनीयम्।।५६।।

हस्तावलम्बितपदा हरिणा यदासी -
दश्माधिरोहणमिषादियमेव धन्या।
रासोत्सवे चरणमस्य हि गोपिकास्ता
वक्षोजलोचनशिरोभिरजस्रमूहुः।।५७।।

प्राणप्रिया कबरभुक्त[७७]विमुक्तपुष्पा -
ण्यप्याददीत न कदापि पुमान्विटोऽपि।
अस्यास्तु केशकुसुमानि हरिः स्व मूर्ध्ना
साक्षाद्बिभर्ति यदसौ तदिदं नवीनम्।।५८।।

पितामहस्यापि पिता स एव
सौम्योपयन्ता स(सु)मुखी च सेयम्।

---

७२. ख.च. म्ब
७३. च. प्रहसम्
७४. च. पटुं निशाटम्
७५. च. विदयत
७६. क.च. निशचरी
७७. च. कबरिमुक्त

आसीदमुष्य प्रियधर्मपत्नी
ततः प्रपञ्चप्रपितामही च।।५९।।

पुरारि नेत्रानलदग्धमूर्तिः
पुरा मनो भूः पुररुद्भवाय।
प्रद्युम्न इत्यालि बभूव सूनु -
रमुष्य सौन्दर्यधनाशयैव।।६०।।

दन्तावलाधिगतदम्पतिजातशोभां
पश्याधुना विजयते नयनाभिरामाम्[७८]।
नीला[७९]ञ्जनाद्रिपतिशृङ्गनिलीयमान
कालाम्बुवाहतटितोर्ह्यपि(ति) कान्तिमे(रे) षा।।६१।।

सृष्टिस्थितिप्रलयकेलिविशारदस्य
लोकत्रयैकनिलयस्य हरेरमुष्य।
यः प्राप्तवान् श्वशुरतां किमसौ चकार
श्रीविष्णुचित्तमुनिरालितपस्सुघोरम्।।६२।।

*अहो भाग्यमहोभाग्यं विष्णुचित्तप्रदात्रता।
अहोरूपमहोरूपमस्य तस्याश्च रामता।।

इति परस्परकृतभाषणानां निजसन्दर्शनेन गलितहृदय[८०]केश-कलापवलयवसनभूषणानां पौरयोषाणामिति श्रुतिपथगतवचः शृण्वन् तासामानीलविलोचनोत्पलद्युतिद्विगुणमेचक[८१] स्वशरीररुचा परिसरगतकनकसौधसालमपि कोमलया श्यामल(लय)न्दामोदर-

७८. ख.ग.च. रामा
७९. ग. प्राप्ता
* श्लोकोऽयं 'च' मातृकायामेव दृश्यते
८०. ख.ग. 'हृदय' इति पदं नास्ति, च. गलितकेशहृदय
८१. क. 'द्विगुण मेचक' इति पदं नास्ति, च. द्विगुणितमेचक

स्निग्धवधूबन्धुजनकरतलधृतनीराजनदीपभाजनं पुनरपि वैवाहिकसदन[८२]मासससाद। अनुरूपरूपयोर्वधूवरयोस्तयोर्निर्वृत्तं वैवाहिकोत्सवमाख्यातुमिव वरुणपुरसुन्दरीणां दिशमभजत प्रतीचीं[८३] मरीचिमाली।

ततः प्रयाते तपने निहन्तुं
तमश्छटां सद्मगता महीनाम्।
निवेशिता तश्छिखरे महाग्नि -
र्ज्वालावलीव प्रबभूव सन्ध्या।।६३।।

हरिरपि स्वपत्नीमेनां पतिपत्नीयशोनिरुन्धयतीमदर्शयदरुन्धतीम्[८४]। अथ मधुरडोलगाथा चतुरबन्धुजनकरमन्दान्दोलितामरुणमणिडोलामधिरुह्य तन्मिथुनमतिमृदुलपवनावधूयमानकोकनदगतकोकमिथुनसदृशमनुचकार लौकिकाचारम्।

अध्यास्य चित्रकटमाश्रितपार्श्वदेश -
मानीय(त) बन्धुभिरनुत्थितगीति[८५]नादैः।
अन्योन्यमेव मिथुनं विहिताभिमुख्यं
तं नालिकेरचलनं ललितं चकार।।६४।।

बहला[८६]गरुगुग्गुलुधूपे समीपनिवेशितमणिप्रदीपे समुल्लिप्त[८७]चन्दनसारे घनसारधूलिधूसरे स्वापगृहोदरे सोपयाने शयने सखीजनपरिहासलीला समुपजनितमन्दाक्षाकुञ्चिताक्षी पुण्डरीकाक्षेण

८२. च. सदन इति पदं नास्ति
८३. क. दिशं प्रतीचीं प्रतिजगाम
८४. ख. स्व पतिपत्तियशो निरुन्धन्तिमदशयतारुन्धतीम्
ग. स्व पतिपत्नियशो निरुन्धतीमदर्शयदरुन्धतीम्
च. पतिपत्नीयशो निरुन्धतीमरुन्धतीमदर्शयरुन्धतीम्
८५. क.च. गीत
८६. ख. बहुला
८७. च. समुपलिप्त

सहव्रतपराशेतवधूः। तयोरुल्ललितानुसन्धो गन्धर्वो मध्यगतः। परस्परव्यतिकरनिरासहेतुरभूत्।

इत्थं व्रतस्थौ स्व विवाहशेषं[८८]
निर्वृत्य च प्रेमयुतौ निशायाम्[८९]।
अथानुरूपं स्वमनोरथानां
सहैव संवेशमवाप तुस्तौ।।६५।।

पञ्चमे हनि(णि)पञ्चबाणशरालसौ[९०] क्रौञ्चाविवाविरत(ल)स्नेहौ स्नेहे नान्योन्यसंसिञ्च्यमाननयनावानन्दितबन्धुजननयनौ विच्छिन्न[९१]कौतुकावप्यवच्छिन्न[९२]कौतुकौ सर(द)सि सज्ञनपरिव्रतौ तौ समज्ञनारमाचेरतुः[९३]।

वैवाहिके तु नियमे विधिवत्समाप्ते
गन्तुं प्रवृत्तमथ तं समयाचतेति।
श्रीविष्णुचित्तमुनिरत्र हरे मदीय
पुत्र्या सहैव वस मज्ञनमङ्गलाय।।६६।।

सयाचि(च)तश्चैवमशेषबान्धवै -
स्संवर्धयन् सर्वजनस्य मङ्गलम्।
उवास तत्रैव चिराय गोदया
श्रीरङ्गवासैकरसोऽपि माधवः।।६७।।

---

८८. ग. वेशात्
८९. ग. निशायाः
९०. च. शरानलमानसौ
९१. क. च्छिन्न
९२. क.च. कौतुकावप्यच्छिन्न
९३. ख. सहमज्ञनारमाचेरतुः, च. सहमज्ञनाच्चतुरमूचे
९४. च. मदीयया
९५. च. त्वम्

गोदापरिणयसन्तोषेण स[९६] तत्कालोचितशीघ्रवाहिने विनयवते वैनतेयायाप्यदिश[९७]देकासनेऽप्येकदेशाध्यासनम् ।

कन्यानुरागस्य तथात्मभक्तेः
श्रीविष्णुचित्तसदृशं सभायाम्।
भूषाम्बरालेपनपुष्पमाल्यै -
रपूजयत् तं त्रिदशातिपूज्यम्।।६८।।

पश्यन्त्यस्तं सुरुचिरवरं(रा) गोदया भक्तियुक्ता -
स्तस्यां पुर्यामखिलजनता नित्यहृष्टा बभूवुः।
गेहे गेहे निरवधिरभूत्सर्वसम्पत्समृद्धिः
काले काले निरमुच[९८]दपि प्राणिनां वृष्टि(रि)मिन्द्रः।।६९।।

इति गोदा पुरोहितेन वेदाधिनाथभट्टाचार्येण श्रीकेशवनाथेन विरचितगोदापरिणये चम्पूकाव्ये पञ्चमस्तबकः। हरिः ओं गोदापरिणयं सम्पूर्णं श्री गोदायैः नमः।

---

९६. क. 'स' इति वर्णः नास्ति, च. सह
९७. ख. दिशि
९८. ख.ग.च. निरमुचि

BIBLIOGRAPHY

1. An Alphabetical Index of Sanskrit, Telugu and Tamil Manuscripts. S.V.U.O.R.I. Tirupati, A.P. 1956.
2. An Alphabetical Index of Sanskrit Manuscripts. Adyar Library, Madras.
3. An Alphabetical List of Manuscripts. Baroda Oriental Institute, Vol.-II, Baroda, Gujarat.
4. A Descriptive Catalogue of the Sanskrit Manuscripts. Govt. Oriental manuscrips Library, Vol.-XXI, Kavyas by Kuppu Swami Sastry M.A., Govt. press, Madras, 1918.
5. A Trennial catalogue of manuscripts. 1919-20, 1921-22. Govt. Oriental Manuscripts Library, Mahamahopadyaya S. Kuppuswami, M.A. Volume - IV, Part-1, Snskrit - A, Govt. Press, Madras, 1927.
6. Descriptive catalogue of Sanskrit Manuscripts. Adyar Library, H.G. Narahari, Vol.-V, Kavya nataka and Alankara, Madras, 1951
7. Godaparinaya Campu Manuscript, Acc. no 6232 from Sri Venkateswara University Oriental Research Institute, Tirupati. A.P.
8. Godaparinaya Campu Manuscript, Acc. no 6256, Sri Venkateswara University Oriental Research Institute, Tirupati. A.P.
9. Godaparinaya Campu Manuscript, Acc. no.12231, Government Oriental Manuscripts Library, Chennai.
10. Godaparinaya Campu Manuscript, Acc. no.12232, Government Oriental Manuscripts Library, Chennai.

11. Godaparinaya Campu Manuscript, Acc. no.9868, Oriental Research Institute, Baroda, Gujarat.
12. R. Phalguna rao. M.Phil thesis. R.S.Vidyapeet, Tirupati, A.P., 2006.
13. Studies in Campu litarature. by C.R.Desh Pande, Bharatiya Vidya Pradashan, Delhi.
14. Introduction to Manuscriptology by R.S. Siva Ganesh Murthy, Sarada Publishing House, Delhi - 110035, 1996
15. Godastuti by Sri Vedanta Desika, Edited by by Sri Govindarajan, D.T.Swamy Publicatons, Tirupati, A.P., 2003.
16. Dandi. Kavyadarsa. Motilal Banarasi Das, Varanasi 1996.
17. आचार्य लक्ष्मीनरसिंहभट्टः, डा. जे. रामकृष्णः, डा. विरूपाक्ष वि. जड्डीपाल्. भारतीयग्रन्थसम्पादनशास्त्रप्रवेशिनी. आङ्ग्लमूलप्रणेता आचार्य एस्. एम्. कत्रे. राष्ट्रियसंस्कृतविद्यापीठम्. तिरुपति. आन्ध्रप्रदेश्.
18. केदारभट्टः. वृत्तरत्नाकरः. भारतीयविद्याप्रकाशन्. देहली, २०००.

परिशिष्टम् - १

मूलमातृकानिर्णयः

पाठसम्पादनकार्येऽस्मिन् पञ्चमातृकाः स्वीकृताः। तासु द्वे मातृके तिरुपतिस्थ (SVUORI) प्राच्यतालपत्रग्रन्थालयात्, द्वे मातृके मद्रपुरीस्थ (GOML) प्राच्यतालपत्रग्रन्थालयात्, एका मातृका (Baroda Oriental Manuscripts Library) बरोडायां स्थितप्रच्यतालपत्रग्रन्थालयाच्च स्वीकृताः। तिरुपतिस्थ मातृकाद्वयमसम्पूर्णम्। मद्रपुरीस्थ मातृकाद्वयं, बरोडायां स्थितमातृका एका च सम्पूर्णम्।

भारतीयग्रन्थसम्पादनशास्त्रप्रवेशिनी इति ग्रन्थमाधारीकृत्य सङ्गृहीतासु मातृकासु मूलमातृका एषा भवितुमर्हति या च सम्पूर्णा, दोषरहिता, समीचीना भवति।

'ग', 'घ' सङ्केतमातृके असम्पूर्णे अतः मूलमातृकारूपेण न परिगणितम्। 'क', 'ख', 'च' मातृकासु 'क' इति सङ्केतमातृका प्राचीना इति दृश्यमानेनैव ज्ञायते। अपि च अन्याभ्यः मातृकाभ्यः न्यूनदोषाः वर्तन्ते। अतः 'क' इति सङ्केतमातृकां मूलमातृकारूपेण स्वीकृतः। अन्यमातृकापाठाः पादटिप्पण्यां स्थापिताश्च। तत्र तत्र मूलमातृकापाठोऽपि पादटिप्पण्यां स्थापितः।

परिशिष्टम् - २

मातृकावंशावली

एकस्य ग्रन्थस्य पाठसम्पादने मातृकावंशावली अवश्यं ज्ञातव्यं, यतो हि इदं ज्ञानेन पठितारः ज्ञास्यन्ति यत् संगृहीतासु मातृकासु प्राचीना का ? नवीना का ? एकस्याः मातृकायाः पूर्वं का मातृका लिखितं स्यात् ? इत्यादयश्च। मातृकावंशावलिनिर्णयः यद्यपि कठिनः तथापि पाठभेदं पुरस्कृत्य निर्णयः स्वीकृतः।

उदा. 1 - प्रथमस्तबके विंशतितमश्लोकः 'वीथ्यां वीथ्यां तमसि विचरन्......' इति वर्तते। अस्य चतुर्थपादः 'पश्यन् पश्यन्नुदितपुलको' इति 'क', 'घ', 'च' सङ्केतमातृकासु, 'दर्शं दर्शं जनितपुलको' इति 'ख', 'ग' मातृकयोश्च वर्तते। अतः -

'क', 'घ', 'च' मातृकाः एकस्याः मातृकापरम्परायाः आगतम् इति वक्तुं शक्यते। 'ख', 'ग' सङ्केतमातृकयोः 'दर्शं दर्शं जनितपुलको' इति दृश्यते। अतः एते द्वे मातृके एकस्याः मातृकापरम्परातः आगतम् स्यात्।

उदा. 2 - प्रथमस्तबके 61 पादटिप्पण्यां 'वर्षार्थम् इति पदाद्यं पद्यं शुश्राव' इति 'क' 'ख', 'ग' मातृकासु वर्तते। किन्तु 'वर्षार्थम्' इति श्लोकं सम्पूर्णतया न लिखितम्। परन्तु 'घ', 'च' मातृकासु सम्पूर्णं लिखितमस्ति। यथा -


वर्षार्थमष्टौ प्रयतेत मासान् निशार्थमध्यं दिवसं यतेत।
वार्धक्यहेतोर्वयसा नवेन परत्र हेतोरिह जन्मना च।।

'क' सङ्केतमातृकायां 'पश्यन् पश्यन्नुदितपुलको' इति 'घ', 'च' सङ्केतमातृकापरम्परापाठः, 'वर्षार्थम् इति पदाद्यं पद्यं शुश्राव' इति 'ख', 'ग' मातृकापरम्परापाठोऽपि च विद्यते। अतः 'क' मातृकापरम्परातः 'ख', 'ग' मातृकापरम्परा 'घ', 'च' मातृकापरम्परा च आगता इति मतिः, अपि च अनयोः मातृकापरम्परायोर्मध्ये भेदास्तु कालक्रमेणागता इत्यनुमीयते।

उदा. 3 - तृतीयस्तबके 'अपि मित्रमसौ जगत्रयाणाम्' इति विंशतितमश्लोकः सर्वासु मातृकासु वर्तते किन्तु 'च' सङ्केतमातृकायां न दृश्यते। श्लोकोऽयं प्रायः विस्मरणं स्यात्।

उदा. 4 - पञ्चमस्तबके द्विषष्टिश्लोकानन्तरं 'अहो भाग्यमहोभाग्यम्' इति श्लोकमेकं अधिकतया 'च' सङ्केतमातृकायां दृश्यते। श्लोकोऽयमनुद्देश्यं लेखकेन लिखितं स्यात्।

उपरितनविषयान् आधारीकृत्य मातृकावंशावली एवं कर्तुं शक्यते-



परिशिष्टम् - ३

पाठभेदनिर्णयः

गोदापरिणयचम्पूकाव्यसम्पादनसमये पाठभेदनिर्णयविषये आश्रिता पद्धतिरित्थं विद्यते। प्रायः मूलमातृकायां विद्यमानपाठः शुद्धपाठत्वेन स्वीकृतः। यदि मूलमातृकायां पाठ अशुद्ध इति ज्ञातः, तदा अन्यासु मातृकासु विद्यमानशुद्धपाठः तत्स्थाने निवेशितः।

मूलमातृकायामशुद्धपाठः, उदा. तृतीयस्तबके -

१. क, ख - मणिजाल (अशुद्धपाठः, १४ पादटिप्पणी)
ग, घ, च - मणिमयजाल (शुद्धपाठः)

मूलमतृकायां विद्यमानपदं तदन्यासु मातृकासु न विद्यते चेत् तर्हि मूलमातृकायां विद्यमानपदमेव समीचीनमिति तथैव स्थापितम्, न च परिवर्तितम्।

उदा.

१. प्रतमस्तबके कुत्रचित् - **च** इत्यक्षरं 'क' मातृकायामेव वर्तते। (पादटिप्पणी ८३)
२. प्रथमस्तबके कुत्रचित् - **मोह** इति पदं 'क' मातृकायामेव वर्तते। (पादटिप्पणी ८५)
३. पञ्चमस्तबके कुत्रचित् - **कुल** इति पदं 'क' मातृकायामेव वर्तते इत्यादयः। (पादटिप्पणी १०)

अनुबन्धः - ४

श्लोकसूची

क्र.सं	श्लोकपादः	पृ.सं	छन्दः
१.	अङ्गेषु तां शैशवशोभमानाम्	२-२१	उपजातिः
२.	अत्यद्भुतं तम(द)वलोक्य चमूचराणाम्	१-३६	वसन्ततिलका
३.	अथ तां निवेश्य तटिनीतटे मुनिः	५-१६	गणाः-स.ज.स.ज.ग
४.	अथानुरूपं निजरूपसम्पदाम्	४-१	वंशस्थम्
५.	अथ क्षितेरर्ककराभितापम्	३-१०	उपजातिः
६.	अद्यापि शेषे किमहं प्रबुद्धा	४-८	इन्द्रवज्रा
७.	अधिकपौरुषमेघनादभीता	३-२६	गणाः - न.भ.र.य
८.	अध्यास्य चित्रकटमाश्रितपार्श्वदेशम्	५-६४	वसन्ततिलका
९.	अपि मित्रमसौ जगत्रयाणाम्	३-२०	पुष्पिताग्रा
१०.	अम्भोजवासविमुखैरलिभिर्बभूवे	३-९	वसन्ततिलका
११.	अर्कांशुतापैरभितः प्रणुन्नात्	५-८	इन्द्रवज्रा
१२.	अरुणचञ्चुगृहीतपिशङ्गरु	३-२७	द्रुतविलम्बितम्
१३.	अलकसुन्दरमाननसुन्दरम्	५-१२	द्रुतविलम्बितम्
१४.	अस्ताचलेन्द्रशिखरप्रभवाटवीनाम्	४-१८	वसन्ततिलका
१५.	अस्ति प्रशस्ता दिशि दक्षिणस्याम्	१-४	इन्द्रवज्रा
१६.	अस्याङ्गसङ्गमसुखस्पृहयैव पूर्वम्	५-५४	वसन्ततिलका
१७.	आद्या निषद्या खिल सौरभाणाम्	२-५	इन्द्रवज्रा
१८.	आमुक्तनूपुरमलक्तकपाटलाभम्	५-२९	वसन्ततिलका
१९.	आमुक्तरत्नकटके लसति प्रकोष्ठे	५-३२	वसन्ततिलका
२०.	आमूलमम्भास्यति शीतलानि	३-३१	इन्द्रवज्रा
२१.	आरक्तगण्डस्थलमाविलाक्षम्	५-४०	इन्द्रवज्रा
२२.	आरुह्य सा काञ्चनरत्नरम्यम्	५-३८	इन्द्रवज्रा

२३. आलम्बिते निजपदे तु करेण विष्णोः	५-३७	वसन्ततिलका
२४. आलिषोडशसहस्रगोपिका	४-३५	रथोद्धता
२५. आलोक्य रूपमतिमानुषमङ्गनानाम्	१-१२	वसन्ततिलका
२६. अवापुरानीलपयोदबृन्दम्	३-१४	इन्द्रवज्रा
२७. आविर्बभूव भगवानधिरुह्य ताक्ष्र्यम्	१-३५	वसन्ततिलका
२८. इत्थमुत्सवमृदूपकल्पित	३-३२	रथोद्धता
२९. इति प्रणयवानुक्त्वा	५-३५	अनुष्टुप्
३०. इत्थं व्रतस्थौ स्व विवाहशेषम्	५-६५	उपजातिः
३१. इत्थं व्रतेन चरितेन तथोपवासैः	४-३८	वसन्ततिलका
३२. इत्थं वदन् तमभिवन्द्य मुनीश्वरं तम्	२-१४	वसन्ततिलका
३३. इत्युक्तवाचं प्रणयावलोकैः	२-३	इन्द्रवज्रा
३४. इत्याकर्ण्य नरेन्द्रभाषितमिदं सभ्याश्च तत्वं परम्	१-२९	शार्दूलम्
३५. उच्चस्थे ग्रहपञ्चकेषु विशदे पक्षे सहस्रद्युतौ	२-९	शार्दूलम्
३६. उद्वाह मङ्गलविधेरुचितोपचारो	५-२२	वसन्ततिलका
३७. उद्विग्रसारसमुदञ्चितपक्षिजालम्	२-७	वसन्ततिलका
३८. उवाह बाहुः पुलकानुबन्धम्	२-११	उपेन्द्रवज्रा
३९. एनं हि मात्र वरविह्वलता तवाक्यात्	५-५३	वसन्ततिलका
४०. कपोलदेशे तिलकं विधाय	५-४४	उपजातिः
४१. कल्याणं करुणासार	१-१	अनुष्ट्प्
४२. कन्यानुरागस्य तथाऽत्मभक्तेः	५-६८	इन्द्रवज्रा
४३. कराग्रनखराङ्कुरैस्तिमिरदन्ति-कुम्भस्थलीः	४-२१	पृथ्वी
४४. कस्तूरिकासौरभमेदुरेषु	३-३०	इन्द्रवज्रा

६७.	चन्द्रातपं रजतभित्तिमयूखमाला	१-५	वसन्ततिलका
६८.	चाम्पेयशाखा वनितास्संमन्तात्	३-२	उपजातिः
६९.	जलज(जलद) कल्पहेमलता वियत्	३-११	द्रुतविलम्बितम्
७०.	जानीहि मां जनक भूभृतमाश्रयन्तीम्	२-१५	वसन्ततिलका
७१.	जित्वेत्थं दुर्विनीताननुपदमयथावादिनो	१-३७	स्रग्धरा
७२.	ततो मृगाक्षीमतिभूषिताङ्गीम्	३-१	उपजातिः
७३.	ततो वसिष्ठः प्रमुखैर्मुनीन्द्रैः	४-३२	उपजातिः
७४.	ततः प्रबुद्धा तलिमात्समुत्थिता	४-३०	वंशस्थम्
७५.	ततः प्रयाते तपने निहन्तुम्	५-६३	उपजातिः
७६.	तारा वधूस्समनुभूय निशामशेषाम्	१-२३	वसन्ततिलका
७७.	तन्वङ्ग्यास्तनुरानीला	५-२८	अनुष्टुप्
७८.	तस्मिन् क्षणे हन्त ममालिनिद्रा	४-३३	इन्द्रवज्रा
७९.	तस्या स्तनद्वितयभारमिमं कृशाङ्ग्याः	२-२५	वसन्ततिलका
८०.	तस्या स्तद्वितयमङ्कुरितं कृशाङ्ग्याः	२-२२	वसन्ततिलका
८१.	तस्यामभूत्तनुभृतां भुवि मुक्त्युपायान्	१-१६	वसन्ततिलका
८२.	तस्यामेव महामुनौ तत इतः पुष्पापचायोद्यते	२-६	शार्दूलम्
८३.	तद्यौवनं केवलमङ्गनाया	२-२७	उपजातिः
८४.	तस्यैवारामभूमौ वरतुलसिलतामूलतः पञ्चवर्ण	२-४	स्रग्धरा
८५.	तस्याः मुखं वीक्ष्य समन्दहासम्	५-३६	उपजातिः
८६.	त्यक्ताञ्जनाभरणचन्दनलेपमाला	४-२	वसन्ततिलका
८७.	ददर्श कमपि स्वप्नम्	४-२९	अनुष्टुप्
८८.	दन्तावलाधिगतदम्पति जातशोभाम्	५-६१	वसन्ततिलका
८९.	दर्शयित्वा ततस्तस्या	५-१४	अनुष्टुप्

९०. दरविकसितलीला दीर्घिका पुण्डरीक	४-५	मालिनी
९१. दीना निनाय दिवसानपि सा कथञ्चित्	२-३२	वसन्ततिलका
९२. दृष्ट्वा कदाचिदथ दामनि विष्णुचित्तः	२-२९	वसन्ततिलका
९३. धरातलस्फोटपथैरजस्रम्	३-८	उपेन्द्रवज्रा
९४. नलिनी विरहेण नष्टकान्तिः	४-१७	वियोगिनी
९५. नाभीसरस्समुदितं नलिनेक्षणस्य	१-२५	वसन्ततिलका
९६. नाम्ना गोदा तव च तनया सेयमस्यास्तु माता	२-१७	मन्दाक्रान्ता
९७. नासादिता मधुकृतेव लता सपुष्पा	२-३१	वसन्ततिलका
९८. निदाघ कालप्रभवं समग्रम्	३-२१	उपेन्द्रवज्रा
९९. निवसन्त्यमुष्यमणिकन्दरोदरे	५-७	गणाः-स.ज.स.ज.ग
१००. निसर्गरक्तेऽप्यधरे नताङ्ग्याः	५-२६	उपजातिः
१०१. निस्पृहत्वमभजन्त सन्ततम्	३-२९	रथोद्धता
१०२. निषेदुषी सत्कुशविष्टरेह्नि	४-१२	उपेन्द्रवज्रा
१०३. निहत्य गाढं तिमिरङ्करौघैः	४-१६	उपेन्द्रवज्रा
१०४. नीत्वोपकण्ठं मधुरानगर्याः	५-२	उपजातिः
१०५. पयोदमणिमण्टपे समयसूत्रधाराज्ञया	३-१५	पृथ्वी
१०६. परिपूरितपौरचन्द्रशाला	२-८	ससजगग, सभरय
१०७. परिफुल्लपाण्डुतरकैरवं सरः	३-२५	गणाः-स.ज.स.ज.ग
१०८. पस्पर्श यस्य चरणौ करपल्लवेन	४-१०	वसन्ततिलका
१०९. पश्यन्त्यस्तं सुरुचिवरं गोदया भक्तियुक्ताः	५-६९	मन्दाक्रान्ता
११०. पश्याग्रतः पर्वतराजमेनम्	५-६	उपजातिः
१११. पाण्ड्येश्वरस्य परतत्वविनिश्चयार्थम्	५-४	वसन्ततिलका
११२. पाणिग्रहाय गुरुबन्धुभिरर्थितापि	२-२८	वसन्ततिलका

११३. पार्श्वस्थिता लता मन्द	२-१०	अनुष्टुप्
११४. पार्श्वे वसन्तीं परमस्य पुंसः	५-१९	इन्द्रवज्रा
११५. प्रत्येरिता पाणितलेन बालिका	५-३७	त.त.ज.र,ज.त.ज.र
११६. प्रस्थानमाकर्ण्य तयोः प्रमोदात्	५-४२	इन्द्रवज्रा
११७. प्रत्युत्थाय पुरोधसा सह नृपः प्रीतः प्रणम्याधरात्	१-३२	शार्दूलम्
११८. प्रादुर्बभूव प्रमदाजनानाम्	३-६	इन्द्रवज्रा
११९. प्राणप्रिया कबर भुक्तिविमुक्तपुष्पा	५-५८	वसन्ततिलका
१२०. प्रालेयवर्ष प्रभवेन्दुबिम्बम्	३-२८	उपजातिः
१२१. प्रासादमारुह्य ततो वधूनाम्	५-४८	उपेन्द्रवज्रा
१२२. पितामहस्यापि पिता स एव	५-५९	उपजातिः
१२३. पुन्नागकुन्दसहकारतमालजम्बू	५-१८	वसन्ततिलका
१२४. पुण्यं पुरा किमचरन् भुवि गोपिकास्ता	४-२४	वसन्ततिलका
१२५. पुरारि नेत्रानलदग्धमूर्तिः	५-६०	उपजातिः
१२६. पूर्वं वारिनिधौ वराहवपुषा मग्नां समुद्धृत्य माम्	२-२	शार्दूलम्
१२७. बालां मुनिः पद्ममुखीं स पश्यन्	२-१२	इन्द्रवज्रा
१२८. बाला लतानामपि पादपानाम्	२-१९	इन्द्रवज्रा
१२९. बिम्बाधरं दृशमपि प्रविवेश यत्र	१-१०	वसन्ततिलका
१३०. बृन्दावनं किमकरोत्सुकृतं वयस्याः	४-२३	वसन्ततिलका
१३१. भृङ्गीगीतैरधिकमधुरैः कीचकोपाङ्गनादैः	५-९	मन्दक्रान्ता
१३२. भूषाम्बरादिरहितं फलमूलफर्णे	५-५५	वसन्ततिलका
१३३. मणिमयगृहवेद्यां मन्मथ त्वां लिखित्वा	४-१४	मालिनी
१३४. महीधराणां कटकाद्विनिर्गता	३-१९	वंशस्थम्
१३५. महीभृतां मूर्ध्नि महाम्बुवाहा	३-१७	उपजातिः

१३६.	मञ्जीरमेका महिला स्व पाणौ	५-४५	उपजातिः
१३७.	मन्दाकिनीसलिलशीकरशीतलेन	१-९	वसन्ततिलका
१३८.	मध्यं तस्यास्त्रिपुरमथनक्षौमसाम्यञ्च-काङ्क्षे	२-२३	मन्दाक्रान्ता
१३९.	मध्यं भृवोर्मण्डयदूर्ध्वपुण्ड्र	५-२४	उपजातिः
१४०.	मन्दानिलो विकचकोमलमाधवीनाम्	३-४	मन्दाक्रान्ता
१४१.	मन्थानशैलमथिताम्बुधि धीरनादैः	३-१६	वसन्ततिलका
१४२.	मागधा मधुरवेणुवल्लकी	१-२२	रथोद्धता
१४३.	माणिक्य मालाञ्चितमौलिभागम्	५-२७	उपजातिः
१४४.	मुररिपुभवनोद्यद्बोधशङ्खप्रणादो	४-४	मालिनी
१४५.	यच्यामृतं मुररिपोरितरैरलभ्यम्	४-२६	वसन्ततिलका
१४६.	यज्ञालकेषु मुखचन्द्रमसो वधूनाम्	१-६	वसन्ततिलका
१४७.	यत्सौधजालशिखरप्रभया विवस्वान्	१-११	वसन्ततिलका
१४८.	यत्पादपद्मयुगमालिसमाधिभेदैः	५-५६	वसन्ततिलका
१४९.	यादो नाथ दिशं गते रविरथेच्छायेव तस्याञ्जसा	४-२०	शार्दूलम्
१५०.	रक्ता पदार्पणपटीव रराज सन्ध्या	४-१९	वसन्ततिलका
१५१.	रङ्गेश्वरं तं रमणीयवेषम्	५-३१	इन्द्रवज्रा
१५२.	रहसि कृतरतीनां यत्र रात्रौ वधूनाम्	१-८	मालिनी
१५३.	लाक्षारसं काचिदुरोजकुम्भे	५-४३	इन्द्रवज्रा
१५४.	वटेश्वरपुराख्यया मुनिभिरीरिता यात्वभूत्	१-१५	पृथ्वी
१५५.	वत्सेव सत्यस्य तटे वनाद्रेः	५-१०	इन्द्रवज्रा
१५६.	वत्से विहङ्गनिनदैरिव ते वदन्ती	५-१५	वसन्ततिलका
१५७.	वरस्य तस्याथ वधूवरस्याः	५-३०	उपजातिः

१७८. सखि तव कथयन्ती स्वैरमाधूतपक्षा	४-६	मालिनी
१७९. सखि न विशति किं ते साम्प्रतं कर्णमार्गम्	४-७	मालिनी
१८०. सख्यश्च सर्वाः प्रतिपालयन्ति	४-९	इन्द्रवज्रा
१८१. सञ्छादिते चेतसि सानुरागे	२-२४	उपजातिः
१८२. सन्तोषहास इव शक्रदिगङ्गनायाः	१-२४	वसन्ततिलका
१८३. सन्ध्यामुपास्य नृपतिस्सनरेन्द्रचिह्नैः	१-२६	वसन्ततिलका
१८४. सम्फुल्लकन्दलवनोदितसौरभेण	३-१३	वसन्ततिलका
१८५. समापिते कर्मणि दम्पती तौ	५-४१	उपजातिः
१८६. सलिलेन सहैव वारिराशेः	३-१८	——
१८७. सयाचितश्चैवमशेषबान्धवैः	५-६७	जतजर, ततजर
१८८. सरभसमभिगन्तुं सम्प्रवृत्तैव काचित्	५-४७	मालिनी
१८९. संवर्धमाना च दिने दिने सा	२-१८	इन्द्रवज्रा
१९०. संवर्धिता तवैवेति	५-३४	अनुष्टुप्
१९१. स्तनकुम्भभरावनम्रमीषत्	२-२६	——
१९२. सखि जहिहि सुनिद्रां साम्प्रतं सुप्रभातम्	४-३	मालिनी
१९३. सान्द्राञ्जनेनाञ्चितमक्षितस्याः	५-२५	उपजातिः
१९४. सा दृष्टमात्रे सहसैव तस्मिन्	५-१३	उपजातिः
१९५. सा शिष्यवर्गैश्शिबिकान्तरालात्	५-१७	इन्द्रवज्रा
१९६. सिन्दूररेणुभरितासु ततो रराज	५-२३	वसन्ततिलका
१९७. सिन्धुवारकुसुमैः कृतहारा	३-३	आर्या
१९८. सुललितगतिभेदान् राजहंसीषु शिष्या	४-११	मालिनी
१९९. सैषाभिलाषेण सहस्य मासे	५-४९	उपजातिः
२००. सैषा सखीव तटिनी स्वतरङ्गहस्तैः	५-५	वसन्ततिलका
२०१. सौदामिनी वनितया सहसानुरागात्	३-१२	वसन्ततिलका

अनुबन्धः - ५

पुष्पिकाः

क - मातृकायां (१२२३१) पुष्पिकाः

प्रथमस्तबकान्ते पुष्पिका - इति श्रीगोदापुरोहितेन वेदाधिनाथबट्टाचार्येण श्रीकेशवनाथेन विरचिते गोदापरिणयचम्पूकाव्ये प्रथमस्तबकः। गोदायै नमः।

द्वितीयस्तबकान्ते पुष्पिका - इति गोदापरिणये चम्पूकाव्ये द्वितीयस्तबकः।

तृतीयस्तबकान्ते पुष्पिका - इति गोदापरिणये चम्पूकाव्ये तृतीयस्तबकः।

चतुर्थस्तबकान्ते पुष्पिका - इति गोदापरिणये चम्पूकाव्ये चतुर्थस्तबकः।

पञ्चमस्तबकान्ते पुष्पिका - इति गोदापुरोहितेन वेदाधिनाथबट्टाटार्येण श्रीकेशवनाथेन विरचितगोदापरिणये पञ्चमस्तबकः। हरिः ओम्। गोदापरिणयं सम्पूर्णम्। श्रीगोदायै नमः

ख - मातृकायां (१२२३२) पुष्पिकाः

प्रथमस्तबकान्ते पुष्पिका - इति गोदापरिणयचम्पूकाव्ये प्रथमस्तबकः।

द्वितीयस्तबकान्ते पुष्पिका - इति गोदापरिणयचम्पूकाव्ये द्वितीयस्तबकः।

तृतीयस्तबकान्ते पुष्पिका - इति गोदापरिणयचम्पूकाव्ये तृतीयस्तबकः।

चतुर्थस्तबकान्ते पुष्पिका - इति गोदापुरोहितेन वेदाधिनाथबट्टाचार्येण श्रीकेशवनाथेन विरचिते गोदापरिणये चम्पूकाव्ये चतुर्थस्तबकः।

पञ्चमस्तबकान्ते पुष्पिका - इति गोदापरिणये चम्पूकव्ये पञ्चमस्तबकः

गोदापरिणयं समाप्तम्। हरिः ओम्।

श्रीनिवासरामानुजमहादेशिकाय नमः।

ग - मातृकायां (६२३२) पुष्पिकाः

प्रथमस्तबकान्ते पुष्पिका - इति गोदापरिणयचम्पूकाव्ये प्रथमस्तबकः। गोदायै नमः।

द्वितीयस्तबकान्ते पुष्पिका - इति गोदापरिणये चम्पूकाव्ये द्वितीयस्तबकः।

तृतीयस्तबकान्ते पुष्पिका - इति गोदापरिणये चम्पूकाव्ये तृतायस्तबकः।

चतुर्थस्तबकान्ते पुष्पिका - चतुर्थस्तबकान्ते पुष्पिका विंशतितमतालपत्रे वर्तते। किन्तु विंशतितमतालपत्रं नोपलभ्यते।

पञ्चमस्तबकान्ते पुष्पिका - इति गोदापुरोहितेन वेदाधिनाथभट्टाचार्येण श्रीकेशवनाथेन विरचिते गोदापरिणये पञ्चमस्तबकः। हरिः ओम्। शुभमस्तु। श्रीमत्यै गोदायै नमः। श्रीमते शङ्कोपगुरवे नमः। श्रीमते रामानुजाय नमः। सकलकलाकविश्रेष्ठश्रीवेङ्कटवरदाचार्याय नमः। **करकृतमपराधं क्षन्तुमर्हन्त सन्तः** श्रीमत्यै गोदायै नमः। श्रीमते शङ्कोपगुरवे नमः। हरिः ओम्।

घ - मातृकायां (६२३२) विद्यमानपुष्पिकाः

प्रथमस्तबकान्ते पुष्पिका -

इति गोदापरिणयचम्पूकाव्ये प्रथमस्तबकः। श्रीमत्यै गोदायै नमः। श्रीमत्सुन्दरगुरवे श्रीमद्वरदगुरवे नमः। गुरुभ्यो नमः।

द्वितीयस्तबकान्ते पुष्पिका -

इति गोदापरिणये चम्पूकाव्ये द्वितीयस्तबकः। श्रीमत्यै गोदायै नमः। श्रीमत्सुन्दरगुरवे। हरिः ओम्। शुभमस्तु।

तृतीयस्तबकान्ते पुष्पिका -

इति गोदापुरोहितेन वेदाधिनाथबट्टाटर्येण केशवनाथेन विरचिते गोदापरिणये चम्पूकाव्ये तृतीयस्तबकः। श्रीमत्सुन्दरगुरवे नमः। पराङ्कुशपरकालयतिवरमुनये नमः।

चतुर्थस्तबकान्ते पुष्पिका -

इति गोदापरिणये चम्पूकाव्ये चतुर्थस्तबकः। श्रीमत्सुन्दरदेशिकाय नमः। वरदगुरवे नमः।

पञ्चमस्तबकान्ते पुष्पिका -

पञ्चमस्तबकस्य अन्तिमभागः नोपलभ्यते। अतः पुष्पिका नोपलब्धा।

च - मातृकायां (९८२८) विद्यमानपुष्पिकाः

प्रथमस्तबकान्ते पुष्पिका - इति गोदापरिणये प्रथमस्तबकः। श्रीमत्यै गोदायै नमः।

द्वितीयस्तबकान्ते पुष्पिका - इति गोदापरिणये द्वितीयस्तबकः। श्रीमत्यै गोदायै नमः।

तृतीयस्तबकान्ते पुष्पिका - इति गोदापरिणये तृतीयस्तबकः। श्रीमत्यै गोदायै नमः।

चतुर्थस्तबकान्ते पुष्पिका - इति गोदापरिणये चतुर्थस्तबकः। श्रीमत्यै गोदायै नमः। श्रीमते हयग्रीवाय परमगुरवे नमः। श्रीमते निगमान्तमहादेशिकाय नमः।

पञ्चमस्तबकान्ते पुष्पिका - इति गोदापरिणये पञ्चमस्तबकः। श्रीमत्यै गोदायै नमः। श्रीमते निगमान्तमहादेशिकाय नमः। श्रीमते हयग्रीवाय परमगुरवे नमः। हरिः ओम् । शुभमस्तु। गोदापरिणयं सम्पूर्णम्।

परिशिष्टम् - ६

'च' सङ्केतमातृकायां ग्रन्थान्ते अधिकताया दृश्यमान श्लोकाः

बरोडातः आनीतमातृकायां ग्रन्थान्ते केचन श्लोकाः दृश्यन्ते। एते श्लोकाः शार्दूलविक्रीडितछन्दसि अनुष्टुप् छन्दसि च वर्तन्ते। एतेषु श्लोकेषु गोदास्तुतिः दृश्यते।

गोदा मे सततं तनोतु नितरां लक्ष्मी प्रशस्तप्रभा
गोदा मे सततं ददातु नितरां वाग्विद्धि सम्पूर्मताम्।
गोदा मे सततं चिराय च गृहे पूर्वोक्त ऋद्धिप्रदा
सन्तुष्टावस्तु प्रमोदजननी सर्वेश्वरी सुन्दरी।।

लोकानामितरानपेक्षफलदा लोकानुरूपस्थिता
लोकेशप्रियकामिनी च सततं गोदा ददातु प्रज्ञाम्।
सर्वैश्वर्यसमृद्धहेतुकपरां रङ्गेशचित्तप्रिया
सर्वैश्वर्यसमृद्धिहेतुकपरा वेदान्तदीपायते।।(२२)

गोदे सम्पूर्णमोदे हरिमणिनिभभे(हे) सुप्रभे सुन्दरास्ये
देदीप्यं मन्दहसेत्र भुवनजननी प्रौढहंसाधिरूढे।
राजद्वीथीमुपेतां सहखगपति सदा राजगोपाल भक्ता
संसेव्य त्वां कदाहं नततततिपरे धन्यधन्यो भवेयम्।।

रङ्गेशो देवकीपुत्रो रक्षतु प्राणसंशये।
गोदा तदनुकूला च तद्धर्ममनुपालयेत्।।
रुक्मिणीसत्यभामाभ्यां रामाभ्यां सङ्गतस्सदा।
श्रियमव्याहतां देया द्विठले शोदधानिधिः।।

परिशिष्टम् - ७

गोदापरिणयचम्प्वाः तालपत्रलभ्यमानस्थानानि

(Availability of Manuscripts of Godaparinaya campu in different Libraries in India)

S.No.	Name of the Institute	No. of mss.	Acc.No		
1.	Sri Venkateswara University Oriental Research Institute, Tirupati.	2	*6232	Pl.	Incom.
			*6256	Pl.	Incom
2.	Government Oriental Manuscripts Library, Chennai.	3	12230	P.	Com.
			*12231	Pl.	Com.
			*12232	Pl.	Com.
3.	Oriental Research Institute, Baroda	1	*9868	Pl.	Com.
4.	Adayar Library, Chennai	1	------		
5.	Oriental Research Institute, Mysore	1	3150	Pl.	Incom.

P. - Paper; Pl. - Palm Leaf; Com. - Complete; Incom. - Incomplete

*Manuscripts involved in Critical Edition.

परिशिष्टम् - ८

सर्वासु मातृकासु स्थितसादारणदोषाः

प्रणेतृणा लिखिता हस्तप्रतिं (Autograph) दृष्ट्वा लेखकाः पुनर्लिखन्ति। दृष्ट्वा पुनर्लेखने लेखकः केचन पदान् परिवर्तनं कर्तुं शक्यते, केचन पदान् अथवा पक्तीन् नूतनतया तादृशस्थलेषु योजितुं शक्यते अथवा केचन पदान् लेखने विस्मरन्ति च। एते पाठभेदत्वेन स्वीकुर्वन्तीति सर्वे जानन्ति एव। किन्तु एते दोषाः भवितुं नार्हन्ति। तर्हि दोषाः के इति चेत् - मातृकालेखने प्रान्तीयभाषाप्रभावः, वर्गपञ्चमाक्षरनियमः, अन्ये व्याकरणदोषा इत्यादयः। सर्वासु मातृकासु तमिलभाषायाः प्रभवः दृश्यते यतो हि चम्प्वाः अस्याः प्रणेता तमिलदेशीयः। उदा. -

१. चम्पू इति लेखने चम्बू इति सर्वासु मातृकासु दृश्यते।

२. सर्वास्वपि मातृकासु वर्गपञ्चमाक्षरनियमः न पालित इति कृत्वा स्वातन्त्र्येणैवास्माभिः स च नियम पालितः। यथा - बिंबाधरं इत्यत्र बिम्बाधरं इति, कुंकुम इत्यत्र कुङ्कुम इत्यादयः।

सूचना - संयुक्ताक्षरलेकनसंदर्भे लिपिकेन पालितनियमः सर्वेषाम् बोधनसौकर्यार्थं किञ्चित्परिवर्तितः। द्वितीयस्तबके यथा -

१. भविनान्त्वन्देह्य इत्यत्र भविनां त्वं देह्य इति ।

२. वदन्तमभि इत्यत्र वदन् तमभि इति ।

परिशिष्टम् - ९

छन्दसां सूची

१. अनुष्टुप्

२. इन्द्रवज्रा

२. उपजातिः

४. उपेन्द्रवज्रा

५. द्रुतविलम्बितम्

६. पृथ्वी

७. मन्दाक्रान्ता

८. मालिनी

९. रथोद्धता

१०. वसन्ततिलका

११. वंशस्थम्

१२. शार्दूलम्

१३. शालिनी

१४. शिखरिणी

१५. स्त्रग्धरा